GRETIL e-library

© 2008

FILE

Name: Sus950__Susena_Ayurvedamahodadhi_Annapanavidhi_MGOS_60.pdf
PURL: http://resolver.sub.uni-goettingen.de/purl/?gr_elib-270
Type: Latin part: searchable PDF/A (text under image); Devanagari part: plain image PDF; with bookmarks/index
Encoding: Unicode (ā ī ū ṛ ṝ ḷ ḹ ṅ ñ ṭ ḍ ṇ ś ṣ ḥ ṃ ...)
Date: 24.7.2014

BRIEF RECORD

Author: Suṣeṇa
Title: Sushena's Ayurveda Mahodadhi – Annapanavidhi [Āyurvedamahodadhau Annapānavidhiḥ]. Ed. with Introduction by S. Venkatasubrahmanya Sastri.
Publ.: Tanjore : T.M.S.S.M. Library 1950
Series: Madras Government Oriental Series, 60; Tanjore Sarasvathi Mahal Series, 20.
Description: xiv, 5, xvi, 104, 2 p.

FULL RECORD

www.sub.uni-goettingen.de/ebene_1/fiindolo/gr_elib.htm

NOTICE

This file may be copied on the condition that its entire contents, including this data sheet, remain intact.

MADRAS
GOVERNMENT ORIENTAL SERIES.

PUBLISHED UNDER THE AUTHORITY
OF
THE GOVERNMENT OF MADRAS.

General Editor :
T. CHANDRASEKHARAN, M. A., L. T.,
Curator,
Government Oriental Manuscripts Library,
Madras.

No. LX.

सुषेणकृतौ

आयुर्वेदमहोदधौ-
अन्नपानविधिः

Tanjore Sarasvathi Mahal Series - 20.

SUSHENA'S
AYURVEDA MAHODADHI - ANNAPANAVIDHI.

Edited with Introduction
BY
Sri S. VENKATASUBRAHMANYA SASTRI,
Vaidya Visarada, Sahitya and Ayurveda Siromani,
Proficient, Registered Medical Practitioner.
Venkataramana Ayurvedic College & Dispensary,
Mylapore, Madras.

PUBLISHED BY
S. GOPALAN, B. A., B. L.,
Hon. Secretary,
for the Administrative Committee,
T. M. S. S. M. Library Tanjore.

1950.

Price Rs. 1—4—0

SRI VENKATESWAR PRINTING WORKS,

KUMBAKONAM.

PREFACE.

The present publication is a treatise on dietetics. The author of the work as stated in the colophon, is **Sushena.** The work is said to be a part of a bigger work called **Ayurvedamahodadhi,** by the same author. The name **Sushena** is familiar to students of Srimad Ramayana as that of the Vanara Physician who treated **Lakshmana** and revived him when he was struck by the **Shakti Ayudha** of **Ravana.**

This work may be an old classical work of unknown date, attributed to the well-known Vanara physician, or the author may be a latter-day physician bearing the name of **Sushena.** The fact that some of the preparations in use in the recent centuries are found mention in this book lends colour to the latter theory. But it is also just possible that an old classical work has been supplemented by a later writer.

Whoever may have been the author, the work is a reliable compilation of Ayurvedic Dietetics. The information it gives is more varied and comprehensive than any other printed treatise, and has therefore been selected for publication.

The edition is based upon three manuscripts whose readings vary slightly from one another. They have been carefully collated and edited by Sri V. Venkata Subrahmanya Sastri, Vaidya Visharada and Siromani in Ayurveda and Sahitya, Venkataramana Ayurvedic College and Dispensary, Mylapore. Our thanks are due to him for his valuable services.

Our grateful thanks are due to the Government of Madras, for their timely grants which have enabled the publication of this and other rare works of this Library.

SARSWATHI MAHAL,
TANJORE,
11—12—1950

S. GOPALAN,
HONORARY SECRETARY.

GENERAL INTRODUCTION
TO
THE MADRAS GOVERNMENT ORIENTAL SERIES.

The Government of Madras took up for consideration the question of publication of the various manuscripts in different languages on subjects like Philosophy, Medicine, and Science etc., early in May 1948. Important Manuscript Libraries in the Madras Presidency were requested to send a list of unpublished manuscripts with them for favour of being considered by the Government for publication. The Honorary Secretary of the Tanjore Maharaja Serfoji's Sarasvathi Mahal Library, Tanjore, alone complied with this request. This list as well as a similar list of unpublished manuscripts in the Government Oriental Manuscripts Library, Madras, were carefully examined and a tentative selection of manuscripts suitable for publication was made. The Government in their Memorandum No. 34913/48-10, Education dated 4—4—1949 constituted an expert committee, with the Curator of the Government Oriental Manuscripts Library, Madras, as the Secretary, for the final selection of manuscripts suitable for printing and for estimating the cost of publications. The following are the members of the Committee :—

THE NAMES OF PERSONNEL OF THE COMMITTEE CONSTITUTED FOR SELECTING MANUSCRIPTS FOR PUBLICATION

1. Sri T. M. Narayanaswami Pillai M. A., B. L.,
2. ,, R. P. Sethu Pillai, B. A., B. L.,
3. ,, C. M. Ramachandra Chettiar, B. A., B. L.,
4. ,, R. Krishnamoorthy (Kalki)
5. ,, Dr. N. Venkataramanayya M. A., PH. D.,
6. ,, M. Ramanuja Rao Naidu, M. A.,
7. ,, V. Prabhakara Sastri.
8. ,, N. Venkata Rao, M. A.,
9. ,, H. Sesha Ayyangar.
10. ,, Masti Venkatesa Ayyangar.
11. ,, M. Mariappa Bhat, M. A., L. T.,
12. Dr. C. Achuta Menon, B. A., PH. D.,
13. Sri C. Kunhan Raja M. A., D. PHIL.,
14. ,, A. Sankaran, M. A., PH. D, L. T.,
15. ,, P. Rama Sastri.
16. ,, S. K. Ramanatha Sastri.
17. Dr. M. Abdul Haq, M. A., D, phill., (Oxon)
18. Afzul-u-Ulma Hakin Khader Ahamed.
19. Sri P. D. Joshi.
20. ,, S. Gopalan, B. A., B. L.,
21. ,, T. Chandra Sekharan, M. A., L. T.,

The members of the Committee formed into Sub-committees for the various languages, Sanskrit. Tamil, Telugu, Kanada, Malayalam Marathi and Islamic languages. They met during the month of May 1949 at Madras and at Tanjore to examine the manuscripts and make a selection. The recommendations of the Committee were accepted by the Government in G. O. No. Mis 2745 Education dated 31—8—1949 and they decided to call these publications as the "**Madras Government Oriental Series**" and appointed the Curator, Government Oriental Manuscripts Library Madras-5, as the General Editor of the publications. The following manuscripts have been taken up for publication during the current year:-

"A" FROM THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

—o—

TAMIL.

1 Kappal Sastram
2 Anubhava Vaidya Murai
3 Atthanakolahalam
4 Upadesa Kandam
5 Colan Purva Pattayam
6 Konga Desa RaJakkal
7 Sivajnana Dipam
8 Sadasiva Rupan, with commentary.

TELUGU.

1 Sangita Ratnakaramu
2 Aushadha Yogamulu
3 Vaidya Nighantu
4 Dhanurvidya Vilasamu
5 Yoga Darsana Vishayamu
6 Khadga Lakshana Siromani.

SANSKRIT.

1 Vishanarayaniyam
2 Bhargava Nadika
3 Hariharachaturangam
4 Brahma Sutra Vritti. Mitaksara
5 Nyayasiddhanta Tatvamrutham.

MALAYALAM.

1 Garbhachikitsa
2 a. Vastulakshanam
b. Silpasastram
c. Silpavishayam
3 Mahasaram
4 Kanakkusaram
5 Kriyakramam.

KANADA.

1 Lokopakara
2 Rattamata

3 Dikshabodhe
4 Asvasastram
5 a. Aushadhagalu
6 Sangita Ratnakara
7 Supasastra.

ISLAMIC LANGUAGES.

1 Jami al-Ashya
2 Tibb e-Faridi
3 Tahquig-al-Buhran
4 Safinat al Najat.

"B" FROM THE TANJORE MAHARAJA SERFOJI'S SARASWATHI MAHAL LIBRARY, TANJORE.

TAMIL.

1 Sarabendra Vaidya Murai. (Diabetes)
Do. (Ear, Nose, Throat and Head).
3 Konganar Sarakku Vaippu
4 Tiruchitrambalakovaiyar with Padavurai.
5 Sarabendra Vaidya Murai (Anaemia)
6 Talasamudram
7 Bharatanatyam

8 a. Pandikeli Vilasa Natakam
b. Pururava Chakravarthi Natakam
c. Madana Sundara Vilasa Natakam
d. Percy Macqueen's Collection in the Madras University Library, of Folklore.

9 Ramayyan Ammanai

10 Sarabendra Vaidya Murai (Asthma, Cough and other lung troubles,.

TELUGU

1 Kamandakanitisaramu

2 Taladasapranapradeepika

3 Raghunatha Nayaka Abhyudayamu, Rajagopala Vilasamu

4 Ramayanamu by Katta Varadaraju.

MARATHI.

1 Natyasastra Sangraha

2 a. Book of Knowledge, Vahi
b. Folk Songs
c. Doradharun Veni Paddhati
d. Aswasa Chatula Tumni

3 a. Pratapasimhendra Vijaya Prabaṇdha
b. Sarabendra Tirthavali
c. Lavani

4 Devendra Kuravanji
5 Bhakta Vilas
6 Sloka Baddha Ramayana.

SANSKRIT

1 Aswasastra with Tricolour illustrations
2 Rajamriganka
3 Anandakandam
4 Gitagovinda Abhinayam
5 a. Cola Champu
b. Sahendra Vilasa
6 Dharmakutam-Sundara Kanda
7 Jataka Sara
8 Vishnutatvanirnaya Vyakhya
9 Sangita Darpana
10 Beeja Pallava.

It is hoped that the publication of most of the important manuscripts will be completed within the next four years.

Some of the manuscripts taken up for publication are represented by single copies in the Library and consequently the mistakes that are found in them could not be corrected by comparing them with other copies. The Editors have however, tried their best to suggest correct readings. The wrong readings are

given in round brackets and correct readings have been suggested in square brackets. When different readings are found, they have been given in the foot note or incorporated in the text itself.

The Government of Madras have to be thanked for financing the entire scheme of publication although there is a drive for economy in all the departments. My thanks are due to the members of the Expert committee who spared no pains in selecting the manuscripts for publication. I have also to thank the various editors who are experts, in their own field, for readily consenting to edit the manuscripts and see them through the press. The various presses that have cooperated in printing the manuscripts in the best manner possible also deserve my thanks for the patience exhibited by them in carrying out the corrections made in the proofs.

MADRAS,
2—1—1951.

T. CHANDRASEKHARAN,
General Editor.

विज्ञापना.

ब्रह्मदक्षाश्विमघवद्विवोदासपुनर्वसून् ।
आयुर्वेदगुरून् वन्दे लोकद्वयहितैषिणः ॥

इह खलु भगवतो ब्रह्मणः सकाशाद् दक्षेण, ततोऽश्विभ्यां, तत इन्द्रेण चाधीता, ततश्च दिवोदासपुनर्वसुमुख्यैरधीत्य प्रचारिता वरीवर्त्यायुर्वेदविद्या । तत्र च कायचिकित्साऽऽदिमेदेन विद्यमानान्यष्टावङ्गानि, अग्निवेशसुश्रुतहारीतादिभिः प्रबन्धेन व्याख्यातानि लोकानुग्रहार्थम् ।

द्विविधं खल्वायुर्वेदस्य प्रकृष्टं प्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः, स्वस्थानां स्वास्थ्यपरिपालनञ्चेति, तयोश्च द्वितीयं ज्याय इतरस्मात् । तस्मिंश्च विषये महदुपक्रियतेऽन्नपानस्य यथावदुपयोगेन.

न सन्ति हि व्याधिप्रतीकारप्रदर्शनप्रवृत्तेष्वपि निबन्धेषु समग्रा रोगास्तथा चिकित्साप्रकाराश्च साकल्येन प्रतिपादिताः । विकाराणां भेषजानाञ्चासङ्ख्येयत्वात् प्रतिपदोक्तविधानेन निर्देष्टुमशक्यत्वात् ।

उक्तं हि :—

" नानारूपैरसङ्ख्येयैर्विकारैः कुपिता मलाः ।
तापयन्ति तनुं, तस्मात् तद्धेत्वाकृतिसाधनम् ॥
शक्यं नैकैकशो वक्तुं " इति ।

तथा :—

" नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥ " इति च ।

तथा, एकैकस्यापि निर्दिष्टस्य रोगस्य बहून्यौषधानि सन्ति प्रतिपादितानि । तत्र चेदमभिप्रेतं भवितुमर्हति, यत; भिन्ना हि प्रकृतयः, तथा दूष्यदेशबलकालानलवयःसत्त्वसात्म्याहारव्याध्यवस्थाऽऽदयो भावाः । ताननुसृत्य, एकैकस्य, एकैकं ह्यौषधं स्याद् यौगिकं अयौगिकमेव वा । ततश्च दोषभेषजवशादूहापोहविधानेन वितर्क्य, यौगिकं कल्पनीयमिति । सिद्धयोगेष्वपि बुद्ध्या विभज्य, आतुरभेदानुसारेण यथायथं विपरिवर्तनं अनुमतमेव । तदेवंविधकल्पनाः सर्वाश्च तत्तद्द्रव्यप्रातिस्विकगुणप्रभावाद्यनवबोद्धृणां दुर्घटमेव । तादृशविज्ञानञ्च न शक्यमधिगन्तुं निघण्टुपरिशीलनमन्तरा ।

उक्तञ्च :—

" निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना ।
अनभ्यासेन धानुष्कः त्रयो हास्यस्य भाजनम् ॥
वैद्येन पूर्वं ज्ञातव्या द्रव्यनामगुणागुणाः ॥
तदायत्तं हि भैषज्यं यज्ज्ञाने स्यात् क्रियाक्रमः " इत्यादि ।

तदेवं निघण्टुभिर्महदुपक्रियते चिकित्सिते । अर्वाचीनैश्च द्रव्यगुणबोधकनिबन्धस्य (materia-medica) पारम्यं अनुमन्यते । तत्रापि न शक्यमेव समग्राणां द्रव्याणां गुणनिरूपणं निरवशेषेण,

पाञ्चभौतिकानामपि तेषां भेदानामानन्त्यात्। ततश्च तत्तत्काले तत्तद्देशे च प्रचुरप्रसिद्धोपयोगगोचराणामेव च शक्या निरूपयितुं गुणागुणास्तदा तदा तैस्तैश्च भिषग्वरैर्निबन्धभूमिः।

तेषु च "प्राणिनां पुनर्मूलमाहारो बलवर्णौजसाञ्च; हिताहारोपयोग एक एव पुरुषवृद्धिकरो भवति, अहिताहारोपयोगः पुनर्व्याधिनिमित्तः" इत्यादिभिः स्पष्टमयमर्थः प्रत्यायितो यत्-आहारद्रव्याणां हि सम्यगवचारणेन शक्यमारोग्यमनुवर्तयितुं; प्रतिविधातुञ्चामयेष्विति। श्रूयते हि :—

"विनाऽपि भेषजैर्व्याधिः पथ्यैरेवोपशाम्यति।
न तु पथ्यविहीनानां भेषजानां शतैरपि" इति।

अतएव च, अनन्तेष्वपि द्रव्यवर्गेषु अन्नपानवर्गमेव प्रधानतमं मन्वानस्तत्रभवान् सुषेणदेवः 'आयुर्वेदमहोदधि' संज्ञिते स्वनिबद्धेऽस्मिंस्तन्त्रे तमेव सप्रपञ्चं निरूपयितुमुद्यतः। यदुक्तं :—

"प्रयोजनं यस्य हि यावदेव
तावत् स गृह्णाति यथाऽम्बु कूपात्" इति।

यद्यप्यायुर्वेदप्रतिपादितविपुलार्थप्रत्याययित्री व्यापिनीयं 'आयुर्वेदमहोदधि' रिति संज्ञा सूचयति निबन्धेऽस्मिन् वर्गान्तराण्यपि स्युः सूत्रितानि, साम्प्रतमनुपलब्धानि लुप्तानि चेति। ग्रन्थस्योपक्रमोपसंहारयोः मङ्गलाशासनप्रतिज्ञाऽऽदिरूपेणानुपलम्भोऽप्यमुमर्थमुपबृंहयति; तथाऽपि, अन्नपानवर्गमात्रस्योपलम्भाद् ग्रन्थान्तरे-

ष्वेतदीयवर्गान्तराणां अनुवादादिरूपेणाप्यपरामर्शाच्च, मन्यामहे 'वर्गस्यास्यैव, अनुपदोक्तन्यायेन प्राधान्यं मनसि कृत्वा सुषेणदेवो विपुलार्थग्राहिण्याऽपि संज्ञया वर्गमम्मुमेव विषयीकृतवान् स्यात् इत्यपि वक्तुं शक्यत' इति ।

अस्योपलब्धानि त्रीणि हस्तलिखितपुस्तकानि। तत् त्रितयमपि त्रुटिबहुलं, अपभ्रंशप्रचुरं, लेखकादिसम्भाव्यमानदोषभूयिष्ठञ्च । त्रयाणामप्यमीषां यथामति परिशोधितानां विवर्तोऽयं प्राकाश्यं नीयमानो निबन्धः । अग्निवेशसुश्रुतवाग्भटसंहिताधन्वन्तरिनिघण्टुराजनिघण्टुभावप्रकाशशालिग्रामनिघण्टुप्रभृतीनां साहाय्येन, तत्र तत्र पाठभेदानां सविचारं संशोधनपूर्वमेकीकृत्य प्रकाशनं धन्वन्तरिकृपया सम्पन्नम् । हस्तलिखितपुस्तकोपलब्धपाठेषु सम्भाव्याः उचिता ये पाठास्ते तत्तत्सविधे कुण्डलिताः प्रकाशिताः ।

भगवतः सौमित्रेः रावणशक्तिक्षतगात्रस्य विचेतनस्य चिकित्सकः 'सुषेणो' नाम वानरयूथपः प्राणान् प्रत्याजहार मारुतिसमानीतौषधिपर्वतोद्धृताभिः विशल्यकरणीसन्धानकरणीसवर्णकरणीसञ्जीवनीभिरिति श्रूयते । तदेवं महात्मनस्तस्य सुषेणस्य नामधेयेन भूषितोऽयं सुषेणदेवो हि कस्यापि राज्ञः प्राणाचार्यः स्थितवानिति शक्यमुत्प्रेक्षितुं यत्तत्र तत्रायं राजानमुद्दिश्य समुचितानि प्रस्तौत्यन्नपानानि। भावमिश्रादिभिरेतदीयपद्यानि क्वचित्तथैव निर्दिश्यन्त इति, तत्समकालिकः, ततः पूर्वतनो वाऽयं भवितुमर्हति । न पुनरतिप्रत्नोऽसौ, यन्नव्यानौत्तरापथिकान् सुबहून् भक्ष्यप्रकारान् फलविशेषांश्चोपदिशति।

अग्रे चात्र पानीयक्षीरमध्विक्षुमद्यनिरूपणरूपं द्रवद्रव्याणां-प्रकरणं, धान्यकृतान्नफलशाकशिखरिणी व्यञ्जनमांसवर्णनात्मकं मध्यतः, व्यायामोद्वर्तनाभ्यङ्गपादमर्दनादीनि चान्ते, इति वर्गीकृत्य स्वस्थातुरहिता आहारविहाराः सम्यक् प्रतिपादिताः ।

सम्भाव्यन्ते चेदम्प्रथमतया प्रकाश्यमानेऽस्मिंस्तन्त्रे शोधकानवधानादिवशात्प्रमादाः, तान् सुधियः दयया मार्जयित्वा क्षन्तुमर्हन्तीति विधेयस्य प्रणतिततिपूर्व उपहारो गुरुचरणयोः ।

इत्थं,

२४-११-५०-क्रि.] (Sd) वे. सु. वेङ्कटसुब्रह्मण्यशास्त्री,
श्रीवेङ्कटरमणायुर्वेदकलाशालाऽध्यापकः ।
मयूरपुरी.

आयुर्वेदमहोदधेः विषयानुक्रमणिका

अन्नपानविधिः

विषयः पृष्ठाङ्कः

अथ पानीयवर्गः

गाङ्गगुणाः : १
यामुनगुणाः : २
नार्मदगुणाः : ,,
गोदावरीगुणाः : ,,
कृष्णवेणीगुणाः : ,,
कावेरीगुणाः : ,,
अकालजलदगुणाः : ,,
देशभेदेन नदीगुणाः : ,,
सामुद्रगुणाः : ३
अष्टविधजललक्षणम् : ,,
नादेयादीनां गुणाः : ४
ऋतुभेदेन जलपानविधिः : ५
उष्णाम्बुगुणाः : ,,
निन्दितजललक्षणम् : ,,
सेव्यजललक्षणम् : ६
निशाऽन्ते जलपानगुणाः : ,,
घ्राणपीतोदकगुणाः : ,,

विषयः		पृष्ठाङ्कः
नेत्ररक्षायै जलोपयोगविधिः	:	६
वारिसेवाक्रमः	:	७
श्रृतोष्णजलगुणाः	:	,,
पानकालभेदेन वारिणो गुणाः	:	,,
श्रृतोदकस्य गुणाः	:	८
पार्श्वशूलादौ शीताम्बुपाननिषेधः	:	,,
गुल्मादौ अल्पजलपानविधिः	:	,,
निर्वापितोदकगुणाः	:	,,
वारिणः प्रशंसा	:	९
सामान्यविधिः	:	,,
काष्ठतप्तोदकवर्गः	:	११
भाजनभेदेन गुणविशेषाः	:	१३

अथ क्षीरवर्गः

क्षीरगुणाः	:	१४
गवां वर्णविशेषे क्षीरगुणविशेषाः	:	,,
भाजनविशेषे गुणविशेषाः	:	१५
महिषीक्षीरम्	:	,,
अजाक्षीरम्	:	,,
उष्ट्रीक्षीरम्	:	१६
अश्वाक्षीरम्	:	,,
स्त्रीस्तन्यम्	:	,,
हस्तिनीक्षीरम्	:	,,

विषयः		पृष्ठाङ्कः
पयःसामान्यगुणाः	:	१७
निन्दितदुग्धम्	:	,,
धारोष्णादिगुणाः	:	,,
अन्यच्च	:	,,
प्राभातिकादिदुग्धगुणाः	:	१८
पूर्वाह्णादौ क्षीरपाने गुणविशेषाः	:	,,
क्षीरविक्रियाकालनियमः	:	,,
धारोष्णस्य पयसः पुनर्गुणकीर्तनम्	:	१९
क्वथितादिक्षीरस्य पथ्यताकालव्यवस्था	:	,,
ज्वरे पयसः पथ्यापथ्यत्वम्	:	,,
असात्म्यक्षीराणां क्षीरकल्पनम्	:	,,
गव्यादिदुग्धभेदेन पानकालनिर्णयः	:	२०
पुनः शृतशीतादिक्षीरगुणवर्णनम्	:	,,
अन्नविशेषैः सह दुग्धप्राशप्रतिषेधः	:	,,
पायसस्य गुणाः	:	,,
समाग्न्यादेरपि त्रिकालपयःपाननिषेधः	:	२१
तीक्ष्णाग्नेस्तु तदनुमतिः	:	,,
पुनः क्षीरप्रशंसा	:	,,
मत्स्यादिभिः सह क्षीरसेवाप्रतिषेधः	:	,,
रसविशेषैः पयःपानविधिः	:	२२

अथ दधिवर्गः

गोदधिगुणाः	:	२२
ऋतुभेदेन दध्युपयोगे गुणागुणाः	:	,,

विषयः		पृष्ठाङ्कः
माहिषदधिगुणाः	:	२३
अजादधिगुणाः	:	,,
आविकस्य दध्नो गुणाः	:	,,
अश्वादधिगुणाः	:	२४
औष्ट्रदधिगुणाः	:	,,
हस्तिनीदधिगुणाः	:	,,
स्त्रीदधिगुणाः	:	,,
दधिखण्डगुणाः	:	२५
असारदधिगुणाः	:	,,
मस्तुगुणाः	:	,,
दधिसामान्यगुणाः	:	,,
मस्तुगुणाः	:	२७

अथ तक्रवर्गः

तक्रगुणाः	:	२७
गव्यमाहिषाजतक्रगुणाः	:	२८
तक्रभेदानां गुणाः	:	,,
तक्रप्रशंसा	:	,,
दोषविशेषे तक्रविशेषविधिः	:	२९
रोगविशेषे तक्रनिषेधः	:	,,
पुनस्तक्रप्रशंसा	:	३०
नवनीतगुणाः	:	३१

विषयः पृष्ठाङ्कः

अथ घृतवर्गः

गोघृतगुणाः : ३१
माहिषघृतस्य गुणाः : ३२
आजघृतस्य गुणाः : ,,
मेषीघृतस्य गुणाः : ३३
औष्ट्रघृतस्य गुणाः : ,,
अन्यच्च : ,,
स्त्रीघृतस्य गुणाः : ,,
हस्तिनीघृतस्य गुणाः : ,,
सर्पिःप्रशंसा : ३४

अथ तैलवर्गः

तैलगुणाः : ३५
सर्षपतैलगुणाः : ३६
रक्तैरण्डतैलगुणाः : ,,
एरण्डतैलगुणाः : ,,
कुसुम्भतैलगुणाः : ,,
करञ्जतैलगुणाः : ,,
अक्षतैलगुणाः : ३७
निम्बतैलगुणाः : ,,
क्षुमातैलगुणाः : ,,
मधुगुणाः : ,,

विषयः पृष्ठाङ्कः

अथ इक्षुवर्गः

इक्षुगुणाः : ३८
इक्षुजातयः : ,,
तासां गुणाः : ३९
यान्त्रिकगुणाः : ,,
फाणितगुणाः ,,
मत्स्यण्डिकादीनां गुणाः : ४०
इक्षुप्रशंसा तद्भेदाश्च : ,,
गुडादीनां गुणाः : ४१

अथ मद्यवर्गः

मद्यगुणाः : ४२
सुराया गुणाः : ,,
वारुण्या गुणाः : ,,
पथ्याबिभीतकसुरागुणाः : ४३
यवसुरागुणाः : ,,
अरिष्टगुणाः : ,,
काञ्जिकवर्गे धान्याम्लगुणाः : ४४

अथ मूत्रवर्गः

मूत्रभेदास्तद्गुणाश्च : ,,

विषयः पृष्ठाङ्कः

अथ धान्यवर्गः

षष्टिकगुणाः	:	४५
महाशालिगुणाः	:	,,
वापितादिधान्यानि	:	,,
शालिभेदाः तद्गुणाश्च	:	,,
धान्यादिषु श्रेष्ठकीर्तनम्	:	४६
शिम्बिधान्येषु मुद्गगुणाः	:	४७
माषगुणाः	:	,,
कुलत्थगुणाः	:	४८
राजमाषगुणाः	:	,,
तिलगुणाः	:	,,
यवगुणाः	:	४९
गोधूमगुणाः	:	५०
कुसुम्भगुणाः	:	,,
सिद्धार्थकगुणाः	:	५१
आढकीगुणाः	:	,,
मुद्गपू [यू] ष गुणाः	:	,,
कुलित्थपूष (यूष) गुणाः	:	५२
मसूरपू (यू) षगुणाः	:	,,
कलायगुणाः	:	५३
शुष्कचणकगुणाः	:	,,
आर्द्रचणकगुणाः	:	,,

विषयः		पृष्ठाङ्कः
भृष्टचणकगुणाः	:	५३
कृष्णचणकगुणाः	:	५४
श्वेतचणकगुणाः	:	,,
सामान्यवचनम्	:	,,

अथ कृतान्नवर्गः

पक्कान्नगुणाः	:	५५
गोधूमफेणिकाः	:	,,
फेणिया	:	,,
गोधूमसांजीलाहुः (डुः)	:	,,
अमृतफलम्	:	५६
कापूरपडीया (भा०)	:	,,
इन्द्रारिका	:	५७
घृतपूरम्	:	,,
साडिया (भा०)	:	,,
क्षीरवटिका	:	,,
तैलपक्वक्षीरवटिका	:	,,
मुद्गवटकाः	:	५८
चणकादिकृताः	:	,,
काञ्जीकवटकाः	:	,,
राजिकाचूर्णसंस्कृतः	:	,,
अम्लवटकः	:	,,

विषयः		पृष्ठाङ्कः
वटकप्रकाराः	:	५९
गोधूममण्डकाः	:	,,
माण्डेपातिया (भा०)	:	,,
वटकादिभक्ष्याणां गुणाः	:	६०
दधिवटकाः	:	,,
चणकादिकृताः	:	,,
वेङ्गणी (भा०)	:	,,
तैलवडिया (भा०)	:	६१
शालिमुद्गपापड (भा०)	:	,,
कूरवडाः (भा०)	:	,,
सातू (भा०)	:	,,
तण्डुलपीढ (भा०)	:	,,

अथ फलवर्गः

दाडिमस्य गुणाः	:	६१
द्राक्षागुणाः	:	६२
मातुलिङ्गगुणाः	:	६३
जम्बीरगुणाः	:	,,
नारङ्गफलगुणाः	:	६४
मधुकर्कटीगुणाः	:	६५
मोचाफलगुणाः	:	,,
नालिकेरीफलगुणाः	:	,,
नालिकेरोदकगुणाः	:	,,

विषयः		पृष्ठाङ्कः
भव्यफलगुणाः	:	६६
आमलकीफलगुणाः	:	,,
प्राचीनामलकफलगुणाः	:	,,
आम्रफलगुणाः	:	६७
कपित्थफलगुणाः	:	,,
फणास (भा०)	:	६८
कर्मर्दगुणाः	:	,,
चिञ्चागुणाः	:	,,
भल्लातकगुणाः	:	,,
खर्जूरगुणाः	:	६९
सिंदीफलगुणाः	:	,,
सुवर्णकदलीफलगुणाः	:	,,
उतती (भा०)	:	,,
पिप्पलफलगुणाः	:	७०
उदुम्बरफलगुणाः	:	,,
उम्बीफलगुणाः	:	,,
राजकोशातकीफलगुणाः	:	,,
सिराकोशातकीफलगुणाः	:	,,

अथ शाकवर्गः

शाकभेदाः	:	७१
तण्डुलीयकगुणाः	:	,,

विषयः		पृष्ठाङ्कः
वास्तुकचिल्लीशाकगुणाः	:	७१
शिग्रुशाकगुणाः	:	७२
राजिकागुणाः	:	,,
शतपुष्पागुणाः	:	,,
कुस्तुम्बरीगुणाः	:	७३
राजवल्लीगुणाः	:	,,
कुसुम्भीगुणाः	:	,,
सार्षपगुणाः	:	,,
वार्ताकगुणाः	:	७४
विम्बीफलगुणाः	:	,,
कर्कोटीफलगुणाः	:	,,
मूलकगुणाः	:	७५
सूरणगुणाः	:	,,
भूकन्दः पिण्डालुश्च	:	,,
आर्द्रकगुणाः	:	७६
कुमुदोत्पलपद्मकन्दगुणाः	:	,,
मृणालगुणाः	:	,,
शृङ्गाटकगुणाः	:	७७
वारिकशेरुकगुणाः	:	,,
वर्जनीयकन्दकीर्तनं	:	,,
कलिङ्गगुणाः	:	,,
कूष्माण्डगुणाः	:	,,

विषयः		पृष्ठाङ्कः
उर्वारुकगुणाः	:	७८
सिन्धणीगुणाः	:	,,
चिल्लीगुणाः	:	,,
काकमाचीगुणाः	:	,,
कौसुम्भगुणाः	:	७९
पुनर्मूलकगुणाः	:	,,
राजिकागुणाः	:	,,
वर्षाभूसिद्धार्थगुणाः	:	,,
कासमर्दगुणाः	:	,,
कर्कोटवार्ताकपटोलकारवेल्लगुणाः	:	,,
कूष्माण्डगुणाः	:	,,
राजकोशातकीतुम्बीफलगुणाः	:	,,
त्रपुसगुणाः	:	,,
कालिङ्गगुणाः	:	,,
शाकसंस्कारकद्रव्यनिरूपणम्	:	,,

अथ शिखरिणीवर्गः

शिखरिणीगुणाः	:	८०
द्वितीया शिखरिणी	:	,,
अन्या शिखरिणी	:	८१
अमृतप्राशशिखरिणी	:	,,

विषयः		पृष्ठाङ्कः
अन्यच्च	:	८२
चन्द्रामृतस्राविणी नाम शिखरिणी	:	,,
अन्यच्च	:	,,

अथ व्यञ्जनवर्गः

व्यञ्जनप्रकाराः	:	८३
अन्यच्च	:	,,
कथिका (भा०)	:	८४
अन्यच्च	:	,,

अथ मांसवर्गः

मांसगुणाः	:	८५
लावमांसगुणाः	:	,,
कृष्णतित्तिरिगुणाः	:	,,
गौरतित्तिरिगुणाः	:	८६
कापिञ्जलगुणाः	:	,,
वार्तकगुणाः	:	,,
ककरोपचक्रिकागुणाः	:	,,
मयूरमांसगुणाः	:	८७
कुक्कुटमांसगुणाः	:	,,
कपोतादिगुणाः	:	,,

विषयः		पृष्ठाङ्कः
कौलिङ्गगुणाः	:	८८
ग्राम्याणां गुणाः	:	,,
कपोतगुणाः	:	,,
जाङ्गलमांसगुणाः	:	८९
अजाविमांसगुणाः	:	,,
ऐणमांसगुणाः	:	,,
शशकमांसगुणाः	:	,,
औष्ट्रादिमांसगुणाः	:	९०
वनचारिणां गुणाः	:	,,
मांसानां गौरवलाघवविचारः	:	,,
वाराहमांसगुणाः	:	९१
शल्लकूर्मादिगुणाः	:	,,
मत्स्यगुणाः	:	९२
ऋतुभेदेन मत्स्यविशेषाणां हितत्वम्	:	,,
स्थानानुसारेण मत्स्यानां गुणाः	:	९३
ककरादीनां गुणाः	:	९४

अथ व्यायामादिप्रकरणं

अभ्यङ्गोद्वर्तनविधिः	:	९४
व्यायामगुणाः	:	९५
व्यायामवर्ज्याः	:	,,
पादमर्दनगुणाः	:	९६
पादमर्दनवर्ज्याः	:	,,

विषयः पृष्ठाङ्कः

अथ भोजनविधिवर्गः

भोजननियमाः : ९७
भुक्त्वा वर्ज्यानि : ,,
भोजनविधिः : ,,
भोजनक्रमः : ९८
अग्नेश्चातुर्विध्यम् : ,,
भोजनसङ्ख्याप्रस्तावः : ,,
विषदूषितान्नपरीक्षा : ,,

अथ ताम्बूलवर्गः

ताम्बूलगुणाः : ९९
ताम्बूलवर्ज्याः : १००
ताम्बूलकालनियमः : ,,
जातीफलगुणाः : १०१
एलागुणाः : ,,
जातिपत्रीगुणाः : ,,
क्रमुकपाककालनियमः : ,,
क्रमुकताम्बूलविशेषाणां गुणविशेषाः : १०२
कर्पूरगुणाः : ,,
कस्तूरीगुणाः : ,,

विषयः पृष्ठाङ्कः

अथ अनुलेपनवर्गः

चन्दनगुणाः : १०२
चन्दनकुङ्कुमाद्यनुलेपनप्रशंसा : १०३

अथ वस्त्रवर्गः

श्वेतदुकूलगुणाः : १०३
सूत्रमयगुणाः : ,,
क्षौमगुणाः : १०४
माञ्जिष्ठगुणाः : ,,

॥ आयुर्वेदमहोदधिः ॥

अन्नपानविधिः

...णी मूत्रमला दिकानां जाता जनित्रीव हरीतकी नृणाम् ॥ ५ ॥

ग्रीष्मे तुल्यगुडां ससैन्धवयुतां मेघाच्च वर्षागमे
तुल्यां शर्करया शरद्यमलया (शुण्ठ्या) युक्तयात्तुषारागमे ।
पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण संयोजितां
राजन् भक्ष (भुङ्क्ष्व) हरीतकीमिव रुजो नश्यन्तु ते शत्रवः ॥ ६ ॥

अव्यायामरता वसन्तसमये ग्रीष्मे व्यवायप्रियाः
सक्ताः प्रावृषि पल्वलाम्भसि नवे कूपोदके द्वेषिणः ।
कट्वम्लोष्णरताः शरद्यधिभुजो हेमन्तनिद्रालसाः
शीताम्भःपरिगाहिनस्तु शिशिरे नश्यन्तु ते शत्रवः ॥ ७ ॥

अथ पानीयवर्गः

स्वादु पाकरसं शीतं त्रिदोषशमनं तथा ।
पवित्रमतिपथ्यं च गङ्गावारि मनोहरम् ॥ ८ ॥

प्रोक्तं स्वादु स्वच्छमत्यन्तरुच्यं पथ्यं पाक्यं पाचनं पापहारि ।
तृष्णामोहध्वंसनं चातिमेध्यं प्रज्ञां धत्ते वारि भागीरथीयम् ॥ ९ ॥

इतिगाङ्गं ।

तस्मात्किंचिद्गुरुतरं स्वादु पित्तापहं परम् ।
वातलं वह्निजननं रूक्षं च यमुनाजलम् ॥ १० ॥

इति यामुनम् ।

अतिस्वच्छं प्रशस्तं च शीतलं लघु लेखनम् ।
पित्तश्लेष्मप्रशमनं नार्मदं सर्वरोगजित् ॥ ११ ॥

इति नार्मदं

कण्डूकुष्ठप्रशमनं वह्निसंदीपनं परम् ।
पाचनं वातपित्तघ्नं वारि गोदावरीभवम् ॥ १२ ॥
पित्तार्तिरक्तार्तिसमीरहारि कुष्ठादिदुष्टामयदोषहारि ।
पथ्यं परं दीपनपापहारि गोदावरीवारि तृषानिवारि ॥ १३ ॥

इति गोदावर्याः ।

रूक्षं च शीतलं वारि वातरक्तप्रकोपनम् ।
किञ्चिल्लघुतरं स्वादु कृष्णवेण्यास्समुद्भवम् ॥ १४ ॥

इति कृष्णवेण्याः ।

कावेरीसलिलं पथ्य-मामघ्नं बलवर्णकृत् ।
आग्नेयमतिशीतं च ददुकुष्ठविषापहम् ॥ १५ ॥

इति कावेर्याः ।

त्रिदोषशमनं पथ्यं स्वादु हृद्यं च जीवनम् ।
भ्रमघ्नं च पिपासाघ्नं दिव्यं वारि मनोहरम् ॥ १६ ॥

इति अकालजलदं ।

मध्यमान्तरदिग्जाताः लघ्व्योदोषत्रयापहाः ।
दक्षिणेया महानद्यः पित्तश्लेष्मविनाशनाः ॥

पथ्याश्चोत्तरदिग्जाता लघ्व्यो दोषत्रयापहाः ।
पूर्वदेशोद्भवा नद्यः सद्योवातकफापहाः ।
पश्चिमाः पित्तलोत्सर्गाः कफवातविनाशनाः ॥ १७ ॥
इति संक्षेपतः प्रोक्ता नद्यः सूक्ष्माश्च संप्रति ।
सामुद्रमुदकं विस्रं सक्षारं सर्वदोषकृत् ॥ १८ ॥
अचक्षुष्यं मदग्लीहगुल्मोदावर्तनाशनम् ।

अथ अष्टविधजललक्षणम् ।

दिव्यादीनां प्रवक्ष्यामि गुणदोषान्विचारतः ॥ १९ ॥
दिव्यान्तरिक्षं नादेयं कौपं चौदेयसारसम् ।
ताडागमौद्भिदं शैलं जलमष्टविधं स्मृतम् ॥ २० ॥
शरत्पयोदनिर्मुक्तमहावैडूर्यसंनिभम् ।
सर्वदोषापहं स्वादु दिव्यमित्युच्यते जलम् ॥ २१ ॥
प्रावृट्जलदनिर्मुक्तमव्यक्तस्वादुलक्षणम् ।
वारि स्फाटिकसंकाशमान्तरिक्षमिति स्मृतम् ॥ २२ ॥
नद्याः शैलप्रसूतायाः गोमेदकमणिप्रभम् ।
प्रशस्तभूमिभागस्थं जलं नादेयमुच्यते ॥ २३ ॥
भूम्युत्खातसमुद्भूतं महाशैलसमुद्भवम् ।
विमलं मधुरं स्वादु कौपं जलमुदाहृतम् ॥ २४ ॥
स्वयं दीर्णशिलाखन्ने (च्छन्ने) नीलोत्पलदलप्रभम् ।
लताविताननसंछन्नं चौदेयमिति संज्ञितम् ॥ २५ ॥
आनूपदेशजं वारि सारसं गुरु पिच्छलम् ।
मधुरं श्लेष्मजननं स्मृतं वातादिकोपनम् ॥ २६ ॥

नद्याः शैलवराद्वापि भूतमेकांतसंस्थितम् ।
लताविताननंछन्नं ताडागमिति संज्ञितम् ॥ २७ ॥
प्रशस्तभूमिभागस्थं नैकसंवत्सरोषितम् ।
कषायमधुरं स्वादु औद्भिदं सलिलं स्मृतम् ॥ २८ ॥
शैलसानुसमुद्भूतं स्पृष्टं वातहिमातपैः ।
लघु शीतामलं स्वादु स्मृतं प्रस्रवणं जलम् ॥ २९ ॥
एताहि (नि) महिषाश्वोष्ट्रगोमृगाजगजादिभिः ।
अदूषितानि पात्रेषु मृण्मयेषु विनिक्षिपेत् ॥ ३० ॥
सर्वमाकाशजं वारि स्वादुतोऽनुमीयते ।
पार्थिवं हि रसाभिज्ञै र्भूमिभागेन लक्ष्यते ॥ ३१ ॥
रक्तकापोतपीताभं पाण्डु श्वेतासितेषुच ।
कट्वम्लतिक्तकं क्षारं कषायमधुरादिभिः ॥ ३२ ॥

अथ नादेयादीनां गुणाः

नादेयं वातलं रूक्षं दीपनं लघुलेखनम् ।
ताडागं वातलं स्वादु कषायं कटुपाकि च ॥ ३३ ॥
वातश्लेष्महरं वाप्यं सक्षारं कटु पित्तलम् ।
चौण्डयमग्निकरं रूक्षं मधुरं कफकृत्तथा ॥ ३४ ॥
कफघ्नं दीपनं हृद्यं लघु प्रस्रवणोद्भवम् ।
सक्षारं पित्तलं कौपं श्लेष्मघ्नं वातजित्तथा ॥ ३५ ॥
मधुरं पित्तशमनमविदाह्यौद्भिदं स्मृतम् ।
केदारं मधुरं पाके गुरुदोषविपाकलम् (प्रोक्तं विपाके-
गुरु दोषलम्) ॥ ३६ ॥

तद्वत्पाल्वलमुद्दिष्टं विशेषाद् दोषलं च तत् ।
सर्वदोषहरं हृद्यं निरवद्यं च जाङ्गलम् ॥ ३७ ॥
कौपं जलं च तृष्णाघ्नं श्रमघ्नं प्रीतिवर्धनम् ।
(आनूपं श्लेष्मलं प्रोक्तं मेदोदोषविवर्धनम् ।)
दीपनं स्वादु शीतं च तोयं साधारणं लघु ॥ ३८ ॥

इति जांगलानूपसाधारणोदकं ।

अथ ऋतुमेदेन जलपानविधिः

कौपं प्रस्रवणं वसन्तसमये ग्रीष्मे तदेवोचितं
काले वा नभवृष्टिदेश्यमथवा कौपं घनानां पुनः ।
नीहारे सरसीतडागविषयं सर्वं शरत्संगमे
सेव्यं सूर्यसितांशुरश्मिपवनव्याधूतदोषं पयः ॥ ३९ ॥
अव्यक्तरसगन्धं यत् शस्तं वातातपापहम् ।
पवित्रमम्बु तत्पथ्यं अन्यत्र (क्व) कथितं पिबेत् ॥ ४० ॥
घर्मसूर्येन्दुसंसिक्तमहोरात्रात्सरं यजेत् ?

अथ उष्णाम्बुगुणाः

तच्चाव्यक्तरसं हिमं लघुतरं घर्मांबु मूर्छापहं
ऋष्णो (?) ष्मातप (तृट्श्लेष्मामय) मोहहं श्रमहरं तन्द्राऽतिनिद्रापहं
हृद्यं स्वादु विचित्रदं स्मृतिकरं दाहौघविच्छेदि ? (दनं)
इत्थं देहमलायुषोर्धृतिकरं संजीवनं जीवनम् ॥ ४१ ॥

अथ निन्दितजललक्षणं

विण्मूत्रतृणनीलिकाविषयुतं तप्तं घनं फेनिलं
दन्तग्राह्यमनार्तवं सलवणं शैवालकैः संभृतम् ।

लूताजन्तुविमिश्रितं गुरुतरं पर्णौघपङ्काविलं
चन्द्रार्काँशुसुगोपितं च न पिबेन्नीरं सदा दोषलम् ॥ ४५ ॥

अथ सेव्यजललक्षणं

प्रसन्नं स्वादु हृद्यं च पथ्यं संतर्पणं लघु ।
एकप्रदेशजं सेव्यं सदा पर्यापितं जलम् ॥ ४३ ॥

अथ निशान्ते जलपानगुणाः

कासश्वासातिसारज्वरकिटिभकटीकोष्ठपृष्ठग्रहादीन्
मूत्रग्राहोदरार्शःश्वयथुकृमिवमीन् कर्णनासाक्षिरोगान् ।
ये चान्ये वातपित्तक्षयकफजकृता व्याधयः सन्ति जन्तोः
तांस्तानभ्यासयोगादपहरति पयःपानमन्ते निशायाः ॥ ४४ ॥
अंभसश्चुलकानष्टौ पिबेदनुदिनं नरः ।
नवनागबलो भूत्वा जीवेद्वर्षशतं सुधीः ॥ ४५ ॥

अथ घ्राणपीतोदकगुणाः

विगतघननिशीथे प्रातरुत्थाय नित्यं
पिबति खलु नरो यो घ्राणरन्ध्रेण वारि ।
स भवति मतिपूर्णश्चक्षुषा तार्क्ष्ययुक्तो (तुल्यो)
वलिपलितविहीनस्सर्वरोगैर्विमुक्तः ॥ ४६ ॥

अथ नेत्ररक्षायै जलोपयोगविधिः

शीताम्बुपूरितमुखः प्रतिवासरं यः
कालत्रयेऽपि नयनद्वितयं जलेन ।
आसिञ्चति ध्रुवमसौ न कदाचिदक्षि-
रोगव्यथाविधुरतां भजते मनुष्यः ४७ ॥

नादेयं नवमृद्घटप्रणिहितं सन्तप्तमर्कांशुभिः
रात्रौ संप्रतिजुष्टमिन्दुकिरणैर्मन्दानिलान्दोलितम् ।
शीतं भिन्नमणिप्रभं लघुतया नास्तीति शङ्कावहं
पाटल्युत्पलकेतकीसुरभितं संसेवयेद्वारि तत् ॥ ४८ ॥

रे रे रुद्रजटाटवीपरिसरव्यालोलभस्माविलं
प्रोन्मज्जत्सुरसुन्दरीकुचतटस्फारच्छलच्छीकरम् ।
धाराधौतकरालितांबरतनुं (?) निःशेषपापापहं
गाङ्गं तुङ्गतरङ्गभङ्गगहनं पानीयमानीयताम् ॥ ४९ ॥ ? ॥ ५० ॥

अथ श्रृतोष्णजलगुणाः

पथ्यं दीपनपाचनं लघुतरं सश्वासकासापहं
हिक्काध्माननवज्वरामशमनं श्लेष्मापहं वातजित् ।
संशुद्धोदरवस्तिशुद्धिकरणं हृत्पार्श्वशूलापहं
गुल्मारोचकपीनसे निगदितं कण्ठ्यं श्रृतोष्णं जलम् ॥ ५१ ॥

पित्तोत्तरे पित्तरोगे पित्तासृक्कफपित्तयोः ।
मूर्छाछर्दिज्वरे दाहे (तृष्णा) ऋष्मातीसारपीडिते ॥ ५२ ॥

धातुक्षीणे विषार्ते च सन्निपाते विशेषतः ।
शस्तं शोषेऽक्षिरोगे च श्रृतं शीतं जलं सदा ॥ ५४ ॥ (३ ?)

अथ पानकालभेदेन वारिणो गुणाः

छत्रामृतं विषं वज्रं चत्वारो वारिणो गुणाः ।
भुक्त्वा तदैव प्रत्यूषे अभुक्ते भोजनैः सह ॥ ५५ ॥

अजीर्णे जीरयत्याशु पीतमुष्णोदकं निशि ।
वर्षासु न जलं ग्राह्यं नादेयं बहुदोषकृत् ॥ ५७ ॥

अथ श्रृतोदकस्यगुणाः

कफे पादावशेषं तु पानीयं लघु दीपनम् ।
दिवाश्रृतं तु यत्तोयं रात्रौ तद् गुरुतां व्रजेत् ॥
श्रृतं शीतं त्रिदोषघ्नमुषितं तच्च दोषकृत् ।
तत्पादशेषं दोषघ्नं अर्धहीनं तु वातजित् ॥ ५७ ॥
रात्रौ श्रृतं तु दिवसे गुरुत्वमपि गच्छति ।

अथ पार्श्वशूलादौ शीताम्बुपाननिषेधः

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ॥ ५८ ॥
आध्माने स्तिमिते कोष्ठे सद्यःशुद्धे नवज्वरे ।
हिक्कायां स्नेहपित्ते च शीताम्बु परिवर्जयेत् ॥ ५९ ॥

अथ गुल्मादौ अल्पजलपानविधिः

गुल्मार्शोग्रहणीक्षये च जठरे मन्दानलाध्मातके
शोफे पांडुगलग्रहे च जगदे (व्रणगदे) मोहे (मेहे) च नेत्रामये ।
वातारुच्यतिसारके कफयुते कुष्ठप्रतिश्यायके
उष्णं वारि सुशीतलं श्रृतहिमं स्वल्पं प्रपेयं जलम् ॥ ६० ॥
निरामोतिजरा (भोजना) दर्वाक् पिबेद्वारि सुशीतलम् ।
अजीर्णे तु पिबेद्वारि शीतलं स्वेच्छया पुनः ॥

अथ निर्वापितोदकगुणाः

तप्तायःपिण्डसंयुक्तं लोष्टनिर्वापितं जलम् ।
सर्वदोषहरं पथ्यं सदा वैरुज्यकारकम् ॥

अथ वारिणः प्रशंसा ।

क्वचिदुष्णं क्वचिच्छीतं क्वचित्क्वथितशीतलम् ।
क्वशिद्भेषजसंयुक्तं क्वचिद्वारि निवार्यते ॥
तृषितो मोहमायाति मोहात्प्राणान्विमुञ्चति ।
तस्मात्स्वल्पं च दातव्यं न क्वचिद्वारि वार्यते ॥ ६५ ॥

पानीयं प्राणिनां प्राणा विश्वमेव हि तन्मयम् ।
अतोन्यंतविधानेऽपि न क्वचिद्वारि वार्यते ॥ ६६ ॥

मूर्छापित्तोष्णदाहेषु विधरे (पित्तरक्ते) मदात्यये ।
भ्रमक्लमपरीतेषु तमके वारि शीतलम् ॥
पिबेद्घटसहस्राणि यावन्नास्तमितो रविः ।
अस्तं गते दिवानाथे बिन्दुरेको घटायते ॥ ६८ ॥

अजीर्णे चौषधं वारि जीर्णे वारि बलप्रदम् ।
भोजने चामृतं वारि रात्रौ वारि विषोपमम् ॥ ६९ ॥

अत्यम्बुपानान्न विपच्यतेऽन्नं
निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ॥ ७० ॥

क्षुधासंशुष्कहृत्कण्ठः प्रथमं कबलान् बहून् ।
न भुक्ते प्रपिबेदम्बु शीतलं मात्रया युतम् ॥ ७१ ॥
तेन हृत्कण्ठशुद्धिः स्यात् सुखेनान्नं पतत्यधः ।
स्निग्धयुक्तं च यद्भुक्तं ततस्संतर्पणं भवेत् ॥ ७२ ॥

आदौ द्रवं समश्नीयात् तताम्बु न पिबेद्बहु ।
मध्ये तु कठिनं भुङ्क्ते यथेष्टं शस्यते जलम् ॥ ७३ ॥
प्राक् द्रवं पुरुषोऽश्नीयात् मध्ये तु कठिनाशनः ।
अन्ते पुनर्द्रवाशी तु वस्त्यारोग्ये (?) न मुंचति ॥ ७४ ॥
तथैव भोजनस्यान्ते पीतमम्बु बलप्रदम् ।
द्रव्यं प्रयाति भुक्तान्ते किन्तु तन्मात्रया पिबेत् ॥ ७५ ॥
आदौ जलं वह्निविनाशकारि
पश्चात्तदन्ते कफबृंहणं च ।
मध्ये तु पीतं समतासुखं च
तस्यामियोगोऽभिमतस्मकृच्च ॥ ७६ ॥
अमृतं विषमिति सलिलं
चेदं निष्ठा (विद्या) दतिविदिततत्वार्थः ।
युक्तया सेवितममृतं
विषमेतदयुक्तितः पीतम् ॥ ७७ ॥
पूरयेद्भागयुगलं कुक्षेश्चान्नेन सुस्थितः ।
जलेनैकं चतुर्थं च वायुसंचारणाय वै ॥ ७८ ॥
ग्रासे ग्रासे तु पातव्यं शीतलं वारि सर्वदा ।
बहुवारियुतं चान्नमग्निं पचति सत्वरम् ॥ ७९ ॥
तस्मादादावतिस्वल्पं मध्ये च तृप्तिदायकम् ।
मात्रया च पिबेदन्ते न रोगैर्बाध्यते नरः ॥ ८० ॥
वासितं नूतनैः पुष्पैः पाटलीचम्पकादिभिः ॥
पथ्यं सुगन्धि हृद्यं च शीतलाम्बु सदा पिबेत् ॥ ८१ ॥

सुगमं यत्सरोवालशकलैरधिवासितम् ।
कर्पूरेण च यत्तोयं तत्पेयं सर्वदा नृणाम् ॥ ८२ ॥
ग्रीष्मे शरदि पातव्यं स्वेच्छया सलिलं नरैः ।
अन्यदा कल्पमेवेते (स्वल्पमेवैतद्) वातश्लेष्मभयात्पिबेत् ॥ ८३ ॥
अन्ये (न्ने) नापि विना जन्तुः प्राणान् संधारयेच्चिरम् ।
तोयाभावे पिपासार्तः क्षणात्प्राणैर्विमुच्यते ॥ ८४ ॥

आदिमध्यावसाने च भोजने पयसा युते ।
कृशं साध्यं (कार्श्यं साम्यं) तथा स्थौल्यं भवन्ति क्रमशो गुणाः
॥ ८५ ॥

पानीयं पानीयं शरदि वसन्ते च पानीयम् ।
नादेयं नादेयं शरदि वसन्ते च नादेयम् ॥ ८६ ॥
इत्यायुर्वेदमहोदधौ श्रीसुषेणकृतौ पानीयगुणाः समाप्ताः ॥

अथ काष्ठतप्तोदकवर्गः ।

गन्धर्वहस्तकाष्ठैश्च तप्तं वारि प्रपूजितम्
अलक्ष्मीरक्तपित्तघ्नं दोषाणां च प्रसादनम् ॥ १ ॥
भल्लातकैश्च काष्ठैश्च तप्तं वारि शुभोदकम् ।
वातश्लेष्महरं पथ्यं वीर्यतेजोविवर्धनम् ॥ २ ॥
पालाशोदुम्बरोद्भूतकाष्ठतप्तं शुभं जलम् ।
व्रणकण्डूहरं चासृक्बलवीर्यविवर्धनम् ॥ ३ ॥
जम्बूकपित्थाम्रजैः काष्ठैः तप्तं वारि तडागजम् ।
मेधाबलप्रदं वीर्यकृमिदोषविनाशनम् ॥ ४ ॥

दुम्बरीकाष्ठजैस्तोयं ताप्यं वापीसमुद्भवम् ।
कफहृत्तच्च निर्दिष्टं दोषाणां च विनाशनम् ॥ ५ ॥

काष्ठैः खदिरजैस्तप्तं रक्तपित्तविनाशनम् ।
आप्यायनकरं ग्रीष्मे श्रेष्ठमुक्तमिदं जलम् ॥ ६ ॥

कदम्बनिम्बजैस्तप्तं सरित्समुद्रजं जलम् ।
पथ्यं दोषहरं कण्डूरक्तपित्तविनाशनम् ॥ ७ ॥

धात्रीदारुभृतं तप्तं मलक्षालनयोदकम् । (?)
वातपित्तहरं श्रेष्ठं रसायनकरं परम् ॥ ८ ॥

पुष्करस्य (मधूकस्य) च काष्ठैश्च तप्तं कूपोद्भवोदकम् ।
वातपित्तहरं श्रेष्ठं रसायनकरं परम् ॥ ९ ॥
(ग्रहणीपाण्डुहृत्कासश्वासहृत्परमं हितं ।)

कर्पूर (कर्कन्धु) दारुसंभूततप्तमुष्णोदकं शुभम् (नादेयमुदकोत्तमम् ।)
जठराग्नेश्च सदनं सुश्रुतेन प्रदर्शितम् ॥ १० ॥

सल्लकीशाकनिर्यासकाष्ठैश्चापि पृथक् पृथक् ।
तप्तं निर्झरजं वारि नामयान् जनयेद्वरम् (रोगान् संजनदेद्बहून्) ॥ ११ ॥

वटैश्चार्जुनकाष्ठैश्च संततं तापितं जलम् ।
बलमेधाप्रजननं (आ) मैत्रेयेण प्रदर्शितम् ॥ १२ ॥

तर्कारी वातहंत्रीच कण्डूत्वग्दोषवर्धनम् ।
वनो (नवो) दकं सुसंतप्तं मलानां क्षालने हितम् ॥ १३ ॥

॥ इति काष्ठतप्तोदकवर्गः ॥

अथ भाजनभेदेन गुणविशेषाः।

हेमपात्रे च सुस्वादु विपाके शीतलं मधु ।
त्रिदोषशमनं वीर्यबलमेधाकरं शुभम् ॥ १ ॥

त्रपुपात्रोदकं यच्च पिच्छलं मधुरं रसे ।
वीर्ये कफप्रदं चाग्निशक्रन्मारुतवर्धनम् ॥ २ ॥

घोषपात्रे यदुदकं विपाके कटुकं गुरु
पित्तश्लेष्मप्रदं वृद्धे यथाकालं बलाय च (वृद्धौ व्यथाकालानुरूपितम्)
॥ ३ ॥

(धारापातपयःपानं घ्राणोपरि सुशीतलम्
श्लेसेवनान्नपतयो (आसेचनं च नयने) त्रिदोषशमनम् हितम् ॥ ४ ॥

ताम्रभाजनके वारि सोष्णं स्वादे सकृत्कटु ।
पित्तानिलप्रदं वृद्धे शक्रन्मारुतनाशनम् (कोपनम्) ॥ ५ ॥

रीतिकापचितं तोयं कटु श्लेष्मविनाशनम् ।
पित्तलं सकटूष्णं च मेहरोगविवर्धनम् ॥ ६ ॥

लोहभाजनसंस्थं च पयः पानं च दूषितम् ।
रक्तपित्तह (क) रं कंडूत्रिदोषशमनं परम् (मददोषाग्निकारकम्) ॥ ७ ॥

लोहभाजनसंतप्तं कण्डूमन्दाग्निकारकम् ।
मलानां रेचने चोक्तमाशयक्षालने हितम् ॥ ८ ॥

मधूदुम्बरपात्रेण तापितं चोदकोत्तमम् ।
वपुः कान्तिप्रदं पित्ते (प्रोक्तं) वह्निमान्द्यकरं सकृत् (चतत्) ॥ ९ ॥

भाजने मृन्मये तप्तं मलानां क्षालने हितम्
धातुसाम्यकरं वीर्यबलौजःपरिवर्धनम् ॥ १० ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते भाजनाधिवासविधिः ॥

इदानीं क्षीरगुणाः कथ्यन्ते ॥

तत्रापि गव्यमाहिषयोरेव सदोपयोगित्वात्
तयोरेव प्रथमं स्वरूपं विचार्यते ॥

गव्यं हिमं मेध्यतमं हि दुग्धं
प्राणप्रदं पित्तसमीरणघ्नम् ।
रसायनं वर्णकरं सुकेश्यं
आरोग्यहेतुः सततं नराणाम् ॥ १ ॥

क्षीरं साक्षात् जीवनं जन्मसाह्या (म्या) त्
तद्धारोष्णं गव्यमायुष्यमुष्णम् ।
प्रातः सायं ग्राम्यधर्मावसाने
भुक्ते पश्चादोकसात्म्यं करोति ॥ २ ॥

अथ गवां वर्णविशेषे क्षीरगुणविशेषाः ।

गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
कफघ्नं रक्तवर्णानां त्रीन् हन्ति कपिलाद (प) यः ॥ ३ ॥

शीतलं मधुरं स्निग्धं वातपित्तहरं परम् ।
वृष्यमोजस्करं हृद्यं श्लेष्मघ्नं च रसायनम् ॥ ४ ॥

पाके स्वादुरसं मेध्यं क्षयक्षीणबलप्रदम्
श्वासकासप्रशमनं श्रमत्रयमदापहम् ॥ ५ ॥
जीर्णज्वरे मूत्रकृच्छ्रे रक्तपित्ते च शस्यते ।
गव्यं पयः पवित्रं च बलपुष्टिप्रकारकम् ॥ ६ ॥
श्रेष्ठं चाक्षव्यमायुष्यं कान्तिलावण्यकारकम् ।
पयो गव्यं तेषां भ्र (श्र) मरुधिरापित्तश्रममद
क्षयालक्ष्मीगुल्मप्रदरगरपाण्डामयहरम् ।
शकृच्छ्लेष्मज्वर (?) श्वयथुप्लीहशमनं
तृषामेदोमूर्छाज्वरमनिलमप्याशु शमयेत् ॥ ७ ॥

अथ भाजनविशेषे गुणविशेषाः ।

ताम्रे वातहरं क्षीरं सौवर्णे पित्तनाशनम् ।
रौप्ये श्लेष्महरं चैव कांस्ये रक्तप्रसादनम् ॥ ८ ॥ इति गोक्षीरम् ॥

अथ महिषीक्षीरम् ।

माहिषं बलवर्णौजो निद्राशुक्त (शुक्र) बलप्रदम् ।
तीक्ष्णाग्निशमनं स्वादु रसे पाके च पुष्टिदम् ॥ १ ॥
व्यायामश्रान्तदेहस्य श्रमघ्नमनिलापहम् ।
निष्कामस्यापि वृद्धस्य स्त्रीषु कामप्रदायकम् ॥ २ ॥
बलिनस्तरुणस्यापि विशेषात्कामदायकम् । इति माहिषम् ॥

अथ अजाक्षीरम् ।

अजानामल्पकाम (य) त्वात् कटुतिक्तनिषेवणात् ।
नात्यम्बुपानाद्व्यायामात् सर्वव्याधिहरं पयः ॥ १ ॥

आजमग्निबलकृत् क्षयकास-
श्वासहृच्चलहरं परमं तत् ।
रक्तपित्तहरमाश्वतिसारे
रक्तजे च कथितं हितमेव ॥ ४ ॥

अथ उष्ट्रीक्षीरम् ।

उष्ट्रीक्षीरं सुस्निग्धोष्णापहारं
पित्तश्लेष्मान्त्यर्शसां च प्रशस्तम् ।
आनाहघ्नं चोदराणां प्रशस्तं
जन्तुघ्नं वै शस्यते सर्वकालम् ॥ ५ ॥

अथ अश्वाक्षीरम् ।

उष्णमैकशफं बल्यं श्वास (शाखा) वातापहं पयः ।
मधुराम्ल (रसं) करं रूक्षं लवणानुरसं लघु ॥ ६ ॥ (खराश्वाक्षीरम्)

अथ स्त्रीस्तन्यम् ।

मानुष्यं (षं) मधुरं स्तन्यं कषायानुरसं हिमम् ।
नस्याश्चोतनपथ्यं च जीवनं लघु दीपनम् ॥ ७ ॥

अथ हस्तिनीक्षीरम् ।

हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु ।
स्निग्धं (स्थै) धैर्यकरं शीतं चक्षुष्यं बलवर्धनम्

अथ पयःसामान्यगुणाः ।

पयोऽभिष्यन्दि गुर्वामं प्रायशः परिकीर्तितम् ।
तदेवास्यतरं (तिशृतं) विद्यात् गुरुतर्पणबृंहणम् ॥ ८ ॥
वर्जयित्वा स्त्रियाः स्तन्यं आममेव हि खंडितम् ।
धारोष्ममममृतं क्षीरं विपरीतमतोऽन्यते (न्यथा) ॥ ९ ॥

अथ निन्दितदुग्धम् ।

अनिष्टगन्धममं च विवर्णं विरसं च यत् ।
वर्जं (र्ज्यं) सलवणं क्षीरं यच्च विग्रथितं भवेत् ।
क्षीरं न भुञ्जीन (दिवा) यदि भुञ्जीत न स्वपेत् ।
यदि स्वपेत्क्षयं चायुस्तस्मात्क्षीरं दिवामृतम् ॥ ११ ॥

अथ धारोष्णादिगुणाः ।

धारोष्णममृतं पथ्यं धाराशीतं त्रिदोषकृत् ।
शृतं शीतं त्रिदोषघ्नं शीतोष्ण [शृतोष्णं] कफवातजित् ॥ १२ ॥
अथाविकं पथ्यतमं शृतोष्णं
माजं पयो वै शृतशीतमेव ।
धारासुशीतं महिषीपयश्च
धारोष्णमेवं हितमेव गव्यम् ॥ १३ ॥

अन्यच्च ।

पित्तघ्नं माहिषं क्षीरं वातघ्नं चाविकं पयः ।
वातपित्तहरं गव्यं त्रिदोषघ्नमजापयः ॥ १४ ॥

अथ प्राभातिकादिदुग्धगुणाः ।

प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीतलम्
रात्रौ सौम्यगुणत्वाच्च व्यायामाभावतस्तथा ॥ १५ ॥

दिवाकराभितप्तानां व्यायामानिलसेवनात् ।
वातपित्तहरं चैव चाक्षुष्यं चापराह्णिकम् ॥ १६ ॥

अथ पूर्वाह्णादौ क्षीरपाने गुणविशेषाः ।

वृष्यं बृंहणमग्निवृद्धिजनकं पूर्वाह्णिकाले पयो
मध्याह्ने बलदायकं रतिकरं कृच्छ्राश्मरीछेदनम् ।
बाले त्वग्निकरं क्षये बलकरं वृद्धस्य रेतोवहं
रात्रौ क्षीरमनेकदोषशमनं सेव्यं सदा प्राणिभिः ॥ १७ ॥

भुक्ता ये कटुतीव्रचण्डविदला ये चाम्लतिक्ता रसाः
रूक्षक्षारविदाहशोषकपरा ये चातितापप्रदाः
काषायाः कटुरूक्षदुर्जरतराः संसेव्यमाना हस- [ठा]
त्तत्सर्वं बलकृत्करोति तरसा दुग्धं निशासेवितम् ॥ १८ ॥

अथ क्षीरविक्रियाकालनियमः ।

मुहूर्तपञ्चकादूर्ध्वं क्षीरं भजति विक्रियाम् ।
तदेव द्विगुणे काले विषवद्धन्ति मानवम् ॥ १९ ॥

अथ धारोष्णस्य पयसः पुनर्गुणकीर्तनम् ।

धारोष्मं [ष्णं] पवनप्रकोपशमनं दुग्धं गवां पुष्टिकृत्
पाण्डुं कामलकं निहन्ति तरसा क्षीणोर्जकृच्छ्रीकरम् ।
दाहं देहगतं कराङ्घ्रिनयनज्वालां च पित्तोन्नतिं
दुष्टास्रं कृशतां कृशानुजनितां कृच्छ्रादिरोगान् जयेत् ॥ २० ॥

अथ क्वथितादिक्षीरस्य पथ्यताकालव्यवस्था ।

अक्वथितं दश घटिकाः क्वथितं द्विगुणाश्च ताः पयः पथ्यम्
उषसि च सरसाद्यां (?) (कोष्णं च स्वरसाढ्यं) यावत्तावत्पयः
प्राश्यम् ॥ २१ ॥

अथ ज्वरे पयसः पथ्यापथ्यत्वम् ।

जीर्णज्वरे कफक्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥ २२ ॥
तस्माच्छृतं वाप्यशृतं क्षीरं तात्कालिकं पिबेत् ।
चतुर्भागजलं दत्त्वा यत्तदावर्तितं पयः ॥ २३ ॥
तस्मात्तद्बलकृच्छ्रघ्नं हितं सर्वरुजापहम् ।

अथ असात्म्यक्षीराणां क्षीरकल्पनम् ।

(येषां न सात्म्यं) एतच्च साक्षात्क्षीरेण पीतं चाध्मानकारकम्
॥ २४ ॥
तेषामर्धजलं दत्त्वा नागरं पिप्पलीयुतम् ।
आवर्तयेत्क्षीरशेषं तत्पीत्वा सुखमावहेत् ॥ २५ ॥

अथ गव्यादिदुग्धभेदेन पानकालनिर्णयः ।

पूर्वाह्णे माहिषं सशर्करं स्वेच्छया वा ?
येषां साम्यं सदा भवेत् ।
(" गव्यं पूर्वाह्णकाले स्यादपराह्णे तु माहिषम्
क्षीरं सशर्करं पथ्यं यथासात्म्यं च सर्वदा " इति पाठ्यम्)
आदौ मध्याह्ने वा (तेनादौ तत्तुमध्ये च) ग्रामस्यान्ते कदाचन ॥२६॥
सर्वं तन्मानशेषं (सर्वभोजनशेषे) तु पयः शस्तं (पेयं) सदा नरैः ।

अथ पुनः शृतशीतादिक्षीरगुणवर्णनम् ।

पित्तघ्नं शृतशीतलं कफहरं पक्वं तदुष्णं पुनः
शीतं यत्तु न पाचितं तदखिलं विष्टम्भदोषावहम्
धारोष्णं त्वमृतं पयः श्रमहरं निद्राकरं कान्तिदं
तृष्यं बृंहणमग्निवर्धनमिति स्वादु त्रिदोषापहम् ॥ २७ ॥

अथ अन्नविषैः सह दुग्धप्राशप्रतिषेधः ॥

क्षीरं भुञ्जीत गोधूमान्नेन नैव च नैव च ।
पिष्टान्नेनापि नाश्नीयान्न दध्ना लवणेन च ॥ २८ ॥
न माषैर्न च मुद्गैर्वा न गुडेन फलेन वा ।
भूमिकन्दैर्न वा शाकैर्मत्स्यमांसादिभिर्न वा ॥ २९ ॥

अथ पायसस्य गुणाः ।

पायसं भक्षयेद्युक्त्या तत्पक्वं हि समं पिबेत् ।
वृष्यं हृद्यं च पथ्यं च तत्पित्तानलनाशनम् ॥ ३० ॥

अथ समाग्न्यादेरपि त्रिकालपयःपाननिषेधः ॥

स्निग्धत्वाद्गौरवाज्जाड्यात् त्रिकालं न पिबेत्पयः ।
समाग्निरपि किं चान्यो मन्दाग्निर्विषमोऽथवा ॥ ३१ ॥

तीक्ष्णाग्नेस्तु तदनुमतिः ।

तीक्ष्णाग्निना तु पातव्यं द्विकालमपि माहिषम् ।
तस्य धातून् पचत्यग्निर्यदा तेन न सिञ्चति ॥ ३२ ॥

अथ पुनः क्षीरप्रशंसा ।

क्षीरं [रसं] हितं श्रेष्ठरसायनं च
क्षीरं वपुर्वर्णबलायुषे च ।
क्षीरं हि चायुष्यकरं नराणां
क्षीरं बलास्थापनमुत्तमं च ॥ ३३ ॥
क्षीरं हि सन्दीपनपाचनीयं
क्षीरं हि चोष्णं मलशोधनं च ।
क्षीरं हि संधानकृदुष्णशीतं
क्षीरं कवोष्णं मलनाशनं च ॥ ३४ ॥

अथ मत्स्यादिभिः सह क्षीरसेवाप्रतिषेधः ।

मत्स्यमांसगुडमुद्गमूलकैः
कुष्ठमावहति सेवितं पयः ।
शाकजाम्बवसुरादिसेवितं
मारयत्यबुधमाशु सर्पवत् ॥ ३५ ॥

अथ रसविशेषैः पयःपानाविधिः ।

क्षीरेण सह भोज्यानि न विरुद्धानि तद्यथा ।
आम्रेष्टा [अम्लेष्वा] मलकं पथ्यं शर्करा मधुरेषु च ॥ ३६ ॥
पटोलः शाक [तिक्त] वर्गेषु कटुके चार्द्रकं भजेत् । [पचेः]
कषायेषु यवश्चैव लवणेषु च सैन्धवम् ॥ ३७ ॥

इत्यायुर्वेदमहोदधौ सुषेणकृते क्षीरवर्गः ॥

अथ गोदधिगुणाः ॥

तत्रापि चातिशीतं च दीपनं बलवर्धनम् ।
वातघ्नं मधुरं रूक्षं दधि गव्यं मनोहरम् ॥ ३८ ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्धनम् ।
वातापहं पवित्रं च दधि गव्यं रुचिप्रदम् ॥ ३९ ॥
अरोचके पीनसमूत्रकृच्छ्रे
शीतज्वरे तद्विषमज्वरे च ।
दुर्नामरोगग्रहणीगदे च
गव्यं प्रशस्तं दधि सर्वदैव ॥ ४० ॥

अथ ऋतुभेदेन दध्युपयोगे गुणागुणाः ।

शरदीष्मवसन्तेषु निन्दितं दधि दोषकृत् ।
ग्र
हेमन्ते शिशिरे तच्च वर्षाकाले फलप्रदम् ॥ ४१ ॥

अथ माहिषदधिगुणाः ।

विपाके मधुरं वृष्यं रक्तपित्तप्रसादनम् ।
बलासवर्धनं चैव विशेषान्माहिषं दधि ॥ ४२ ॥
स्निग्धं मधुरशीतं च बलवर्णकरं परम् ।
वृष्यं मेदःकरं स्वादु श्रमघ्नं वातनाशनम् ॥ ४३ ॥
श्लेष्मामवर्धनं चैव सपुष्टिकरं तथा ।
पवित्रमुष्णशमनं माहिषं कान्तिवर्धनम् ॥ ४४ ॥
माहिषं दधि बलासकारकं
वह्निमान्द्यकरमाशु गुरुत्वात् ।
तत्प्रयोज्य कटुकैरवचूर्णै
माहिषं च लघुतामुपयाति ॥ ४५ ॥ ॥ माहिषं दधि ॥

अथ अजादधिगुणाः ।

दध्यमुं (घ्याजं) कफवातनाशनकरं वातघ्नमुष्णं तथा
दुर्नामश्वसने च काससहिते चाग्नेश्च संदीपनम् ।
वृष्यं बृंहणमग्निकान्तिबलदं सर्वामयध्वंसनं
आर्शांशेष्व (र्शःस्व) तिसारके विगदितं पथ्यं सदा प्राणिनाम् ॥ ४६ ॥
कासश्वासहरं रुच्यं शोफार्तीसारनाशनम् ।
आग्नेयं सर्वदोषघ्नं विशेषाच्छागलं दधि ॥ ४७ ॥

अथ आविकस्य दध्नो गुणाः ।

आविकं स्निग्धमधुरं गुरु पित्तकफप्रदम् ।
पथ्यं केवलवातेषु शोफे चानिलशोणिते ॥ ४८ ॥

अथ अश्वादधिगुणाः ।

वाजिजं समधुरं बलवर्णं
स्वेददाहमुपयाति विनाशम् (गुरुत्वम्)।
दीपनीयमतिदोषलं सदा
चाक्षुषं च मरुतः प्रविकोपि ॥ ४९ ॥

अथ औष्ट्रदधिगुणाः ।

वातार्शकुष्ठक्रिमिनाशनं स्यात्
औष्ट्रं विपाके कटुकं सतिक्तम् ।
सक्षारमम्लं कटु कुष्ठकोपि (कृमिकोष्ठनाशनं)
बल्यं च संतर्पणमाशुकारि ॥ ५० ॥

अथ हास्तिनीदधिगुणाः ।

गुरु चोष्णं कषायं च कफमूत्रापहं च तत् ।

अथ स्त्रीदधिगुणाः ।

स्निग्धं विपाके मधुरं बल्यं संतर्पणं गुरु ॥ ५१ ॥
चाक्षुष्यं सर्वदोषघ्नं दधिकात्र (नार्या) गुणोत्तमम् ॥ ५२ ॥
लघुणा [पा] के बलासघ्नं वीर्योष्णं पित्तनाशनम् ।
कषायानुगुणं नार्या दधि वर्चोविवर्धनम् ॥ ५३ ॥
कुर्यादुत्तयाभिलाषं च दधि मस्कपरिप्लुतम् ।
सतुक्षीरेण यज्जातं गुरुवद्दधि तत्स्मृतम् ॥ ५४ ॥ (१)
(दध्नस्तु यदधस्तोयं तन्मस्तुनि परिप्लुतं ।
प्लुतात् क्षीराच्च यज्जातं गुणवद्दधि तत्स्मृतम् ।)
वातपित्तहरं रुच्यं धात्वग्निबलवर्धनम् ।

अथ दधिखण्डगुणाः ।

दध्नः खण्डो गुरुर्वृष्यो विज्ञेयो बलवर्धनः ।
वस्त्रविवन (निष्पीडित) श्चापि कफपित्तविनाशनः ॥ ५५ ॥

अथ असारदधिगुणाः ।

दधि त्वसारं रूक्षं च ग्राहि विड्भेदि (विष्टम्भि) वातलम् ।
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ॥ ५६ ॥

अथ मस्तुगुणाः ।

तृष्णाक्लमहरं मस्तु [शीतं] [स्रोतो] विशोधनम् ॥
अमुं कषायं मधुरं अवृष्यं कफवातनुत् ॥ ५७ ॥

अथ दधिसामान्यगुणाः ।

अमुं स्याद्रसपाकतो गुरुतरं वातापहं शीतलं
ग्राह्युष्णं ग्रहणीगदे निगदितं विण्मूत्रकृच्छ्रापहम् ।
वल्यं शोफकफाग्निमान्द्यजननं रक्तप्रदं शुक्रदं
[कासा] रूक्षारोचकपीनसे विषमके शीतज्वरे तन्मय [त] म् ॥ ५८ ॥
ग्रहण्यां पीनसे मूत्रकृच्छ्रे च विषमज्वरे ।
अरोचके च मन्दाग्नौ शस्यते दधि सर्वदा ॥ ५९ ॥
लवणमरिचसर्पिःशर्करामुद्गधात्री-
कुसुमरसविहीनं [नै] चैवमद्यात्तु नित्यम् ।
न च शरदि वसन्ते नोष्णकाले न रात्रौ
न दधि कफविकारे [पित्त] पीतरोगे न दद्यात् ॥ ६० ॥

एलासैन्धवशर्करं समरिचं धात्रीगुडं सर्पिषा
पथ्यं स्याद्वरमुद्गसूपसहितं संसेवनीयं दधि ।
नैवोष्णं बहु पिच्छलं न च शरद्ग्रीष्मे वसन्ते हितं
पित्तासृक्ज्वरकुष्ठदं भ्रमकरं (बी) वासर्पदं चान्यथा ॥ ६१ ॥
दधि त्रिकटुकमिश्रं राजिकाचूर्णमिश्रं
कफहरमनिलघ्नं चाग्निसंधुक्षणं च
तुहिनशिशिरकाले सेवनीयं च पथ्यं
भवति सुदृढकायो रूपवान् सत्ववांश्च ॥ ६२ ॥
(रचयति तनुदार्ढ्यं कान्तिमत्त्वं च नृणाम्)
सगुडदधि सुखोष्णं धौतवस्त्रेण सम्यक्
युवतिकरविलासैर्गालितं धूपितं च ।
शिशिरकिरणविश्वाजाजिचूर्णेन मिश्रं
कफहरमनिलघ्नं चाग्निसंधुक्षणं च ॥
(तुहिनशिशिरकाले सेवनीयं च पथ्यं ।
भवति सुदृढकायो रूपवान् सत्ववांश्च) ॥
अधिकतरविलासैः सेवितं मर्दितं च ॥ ६३ ॥
दधि तरुणमपथ्यं पथ्यसंपुष्टिहेतोः
बलकरमतिवृष्यं मेदकृद्दीपनं च ।
कफहरमनिले स्यान्नातिपित्तप्रकोपं
तदनिशमिह सेव्यं माधुरं चाम्लभावात् ॥ ६४ ॥
मधुरं भक्षयेच्चैतदत्यम्लं वर्जयेत्सदा ।
मधुरं दधि रोगघ्नं अत्यम्लं रोगकारकम् ॥ ६५ ॥

॥ इत्यायुर्वेदमहोदधौ सुखेन (षेण) कृते दधिवर्गः ॥

॥ अथ मस्तुगुणाः कथ्यन्ते ॥

[स्रो] श्रोतः शुद्धिं विधत्ते प्रकटयति रुचिं दीपयत्याशु वह्निं
कृत्वा शुद्धिं मलानां जरयति च हठाद्भुक्तमन्नं विचित्रम्
उष्णं चाम्लं कषायं लघु सुरभिरसं शूलविष्टम्भहारि
श्रेष्ठं मस्तु प्रशस्तं कफपवनरुजादुष्टमूत्रग्रहेषु ॥ १ ॥
लघ्वन्ने रुचिपक्तिदं क्लमहरं बल्यं कषायं सरं
भक्तच्छन्दकरं तृषोदरहरं ग्लीहार्शशोफापहम् ।
वान्तौ शुद्धिकरं कफानिलहरं विष्टम्भशूलापहं
पाण्डौ मूत्रविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥ २ ॥
लघुत्वादीपनत्वाच्च विष्टम्भाध्माननाशनात् ।
[स्रो] श्रोतःशुद्धिकरत्वाच्च ताक्राद्दधि (?) विकाश्यते ॥ ३ ॥

॥ इत्यायुर्वेदमहोदधौ मस्तुवर्गः ॥

इदानीं तक्रगुणाः कथ्यन्ते ॥

घोलं मथितमुदश्वित्तक्रं चैतच्चतुर्विधं कथितम् ॥
सरसं निर्जलं स्वादु की(य)दम्भोवर्जितं मथितम् ।
(सरसं निर्जलमाद्यं निर्हृतरसमम्बुवर्जितं मथितम्)
[अर्ध] पादसलिलमुदश्वित्तदर्धं [पाद] जलं तक्रमाहुश्च ॥
प्रत्येकं च चतुर्णां कथा ज्ञेयाः प्रयत्नेन ॥ २ ॥
सरसं निर्जलं ज्ञेयं [घोलं] मथितं रसवर्जितम् ।
पादोदकमुदश्वित्तक्रमर्धजलं भवेत् ॥ ३ ॥

अथ गव्यमाहिषाजतक्रगुणाः ।

गव्यं तु दीपनं तक्रं मेध्यमर्शस्त्रिदोषजित् ।
माहिषं श्लेष्मलं तक्रं [छागं] लघु दोषत्रयापहम् ॥ ४ ॥
गुल्मार्शोग्रहणीशोफपाण्ड्वामर्थ [य] विनाशनम्

अथ तक्रभेदानां गुणाः ।

घोलं मारुतपित्तहारि मथितं श्वासापहं श्लेष्महृत्
पित्तश्लेष्मविनाश्युदश्विदधिकं तक्रं त्रिदोषापहं ॥
मन्दाग्नावरुचौ तथैव नितरामन्येषु रोगेष्वपि
श्रेष्ठं तक्रमिदं वदन्ति मुनयस्तेनोत्तमं प्राणिनाम् ॥ ६ ॥

अथ तक्रप्रशंसा ।

यथा सुराणाममृतं प्रधानं
तथा नराणां भुवि तक्रमाहुः ।
अम्लेन वातं मधुरेण पित्तं
कफं कषायेण निहन्ति सद्यः ॥ ७ ॥
वातश्लेष्मविनाशनं [कृमिहरं] कृच्छ्राश्मरीछेदनं
मूत्राघातहरं प्रमेहशमनं प्लीहार्तिगुल्मापहम् ।
दुर्नामोदरपाण्डुरोगजठरक्रूरार्तिनिष्कृन्तनं
तक्रं दीपनपाचनं लघुतरं पथ्यं सदा प्राणिनाम् ॥ ८ ॥
आमातिसारे च विशा [पृ] चिकायां
वातज्वरे पाण्डुषु कामलेषु ।
प्रमेहगुल्मोदरवातशूले
नित्यं पिबेत्तक्रमरोचके च ॥ ९ ॥

तक्रं स्वादु कषायमम्लकरसं भक्षं (क्ष्यं) लघूष्णं हितं
गुल्मार्शःपरिणामशूलशमनं छर्दिप्रसेकापहम् ।
तृष्णारोचकमेहशोफगरजित् श्लेष्मालसघ्नं पयं (रं)
सेव्यं मूत्रगदापहं ज्वरहरं स्नेहोत्थपीडापहम् ॥ १० ॥
शीतकालेऽग्निमान्द्ये च कफोत्थे कामलासु च ।
मार्गावरोधे दुष्टौ च वाग्नौ (यौ) तक्रं प्रशस्यते ॥ ११ ॥
न (तत्) पुनर्मधुरं श्लेष्मप्रकोपनपरं परम् ।
वातघ्नं पित्तशमनंअम्लं चेत्पित्तकृत्सदा ॥ १२ ॥

दोषविशेषे तक्रविशेषविधिः ।

वातघ्नं (तेऽम्लं) सैन्धवोपेतं स्वादु पित्ते सशर्करम् ।
कफपित्तेऽपि (पिबेत् कफेऽपि) वा तक्रं व्योषक्षारसमन्वितम् ॥ १३ ॥
स्थौल्यं करोति हरतेनिलमेतदेव
यन्नोष्णतामपगतं न कदाचिदेव ।
सर्पिः शि(सि)तामधुकमुद्गकषाययुक्तं
सेव्यं वसन्तशरदागमकालवर्जम् ॥ १४ ॥
नवनीतद्वारे मथितं कथयन्ति सुधियः ।
चिरमथितं पुनरुत्पत्तिकरं नरस्य दोषाणाम् ॥ १५ ॥

रोगविशेषे तक्रनिषेधः ।

नैव तक्रं क्षते दद्यान्नोष्मकाले न दुर्बले ।
न मूर्छाश्रमदाहेषु न रोगे रक्तपैत्तिके ॥ १६ ॥

तक्रप्रशंसा ।

शशिकुन्दसमप्रभशङ्खनिभं
युवतीकरनिर्मलनिर्मथितम् ।
परिपक्वसुगन्धिकपित्थरसं
पिब भो नृप तक्रं रुजापहरम् ॥ १७ ॥
मथितं गोरसं घोलं द्रवमस्तुविलोडितम् ।
श्वेतं दंडहतं सान्द्रं नामतः परिकीर्तितम् ॥ १८ ॥
द्विगुणाम्बुश्वेतमिदमर्धोदकमिति स्मृतम् ।
तक्रं त्रिभागमिश्रं तु केवलं मथितं स्मृतम् ॥ १९ ॥
तक्रस्योपरि यत्तोयमुदश्वित्परिकीर्तितम् ।
दध्नस्तूपरि यत्तोयं तन्मस्तु परिकीर्तितम् ॥ २० ॥
ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका ।
तक्राल्लघुतरो मण्डः कूचिका दधितक्रवत् ॥ २१ ॥
अक्रुत्वं गयतस्तक्रं क्रतुत्वेन शातक्रतुः (?) ।
तस्मात् त्रिविष्टपे जातं तक्रं शक्रस्य दुर्लभम् ॥ २२ ॥
कैलासे यदि तक्रमस्ति गिरिशः किं नीलण्ठो भवेत्
वैकुण्ठे यदि कृष्णतामनुभवेदद्यापि किं केशवः ।
इन्द्रो दुर्भगताभयाद्विजयति(तां क्षयं द्विजपतिः) लम्बोदरत्वं गणः
कुष्ठित्वं च कुबेरको दहनतामग्निश्च दिव्यस्ति चेत् ॥ २३ ॥
यद्द्रव्यं शङ्खवर्णं हिमपटलनिभं चारुगंधः सुशीतं
गङ्गापानीयशुभ्रं युवतिकरमयस्फालनाजर्जरं च ।
मन्थानेनानुविद्धं करतलरभसाद्बुद्बुदाकारफेनं
तत्तक्रं सूपधूपं त्वमृतगुणनिभं भाग्यवन्तः पिबन्ति ॥ २४ ॥

॥ इत्यायुर्वेदमहोदधौ सुखेन (षेण) कृते तक्रवर्गः ॥

॥ अथ नवनीतवर्गः कथ्यते ॥

शीतं वर्णबलप्रदं समधुरं वृष्यं च संग्राहकं
वातघ्नं कफ (का) हारकं रुचिकरं हृद्यं त्रिदोषापहम्
(सर्वाङ्गशूलापहम्) ।
कासाध्वश्रमशान्तिदं रतिकरं कान्तिप्रदं पुष्टिदं
सद्यस्कं नवनीतमुद्धृतमिदं स्यात्सर्वरोगापहम् ।
(चक्षुष्यं नवनीतमुद्धृतनवं मोःसर्वदोषापहम्) ॥
शीतं बलाढ्यं मधुराम्लवृष्यं
श्लेष्मा (व) पहं पित्तमरुत्प्रणाशम् ।
शोकक्षयक्षीणकृशान्ति (ति) वृद्ध-
बालेषु पथ्यं नवनीतमुष्ण (क्त) म् ॥ २ ॥
गव्यं वा माहिषं वापि नवनीतं नवोद्धृतम् ।
शस्यते बालवृद्धानां बलकृद्धातुवर्धनम् ॥ ३ ॥
शीतं वर्णबलप्रदं समधुरं वृष्यं हि संग्राहकं
हृद्यं श्वासजरापहं क्षयहरं पित्ताम्लवातापहम् ।
कासार्शोदिन (ताप) शोफशमनं स्रस्ताङ्गपीडापहं
सद्यस्कं नवनीतमाहिषमिदं स्यात्सर्वरोगापहम् ॥ ४ ॥

॥ इति नवनीतगुणाः ॥

॥ अथातो घृतगुणाः कथ्यन्ते ॥

तत्रादौ गोघृतस्य गुणाः

धीकान्तिस्मृतिकारकं बलकरं मेधाप्रदं वृद्धिकृत्
वातघ्नं श्रमनाशनं स्वरकरं पित्तापहं पुष्टिदम् ।

वह्नेर्वृद्धिकरं विपाकमधुरं वृष्यं च शीतं सदा
सेव्यं गव्यमिदं घृतं बलकरं सद्यःसमावर्तितम् ॥ १ ॥
सर्पिर्गवां चामृतकं विषघ्नं
चाक्षुष्यमारोग्यकरं च वृष्यम् ।
रसायनं मन्दमतीव मेध्यं
स्नेहोत्तमं च (गोः) विबुधा वदन्ति

अथ माहिषघृतस्य गुणाः

सर्पिर्माहिषमुत्तमं धृतिकरं सौख्यप्रदं कान्तिदं
वातश्लेष्मनिबर्हणं बलकरं वर्णप्रसादक्षमम् ।
दुर्नामग्रहणीविकारशमनं मन्दानलोद्दीपनं (?)
चाक्षुष्यं नवगव्यतः फल (पर) मिदं हृद्यं मनोहारि च ॥ २ ॥
माहिष्यं तन्मानुषणां च शस्तं
बल्यं वृष्यं बस्तिसादं करोति ।
मेदोद्भूतं मेहकृच्छ्रैत्यकारि
तस्मान्नित्यं सर्वकालं निषेव्यम् ॥

आजघृतस्य गुणाः

दीपनीयमजासर्पिः चाक्षुष्यं बलवर्धनम् ।
कासश्वासक्षये वापि पथ्यं पानेषु तल्लघु ॥

मेषीघृतस्य गुणाः ।

आविकं घृतमतीव गुरुत्वा
द्वर्ज्यमेव सुकुमारनरैश्च ।

औष्ट्रघृतस्य गुणाः

सद्य एव बलपुष्टिकरं स्या
दुष्ट्रजं श्वयथुकासकरं च ॥

अन्यच्च

गव्यं च पाचितं सर्पिः वमिपीतकफापहम् ।
पयसोनुगुणं मेषां (षी) छागीगर्दभिकाघृतम् ॥ ७ ॥
औष्ट्रीघृतं वीर्यकटु श्लेष्मक्रिमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥ ८ ॥
पाके लघ्वादि (वि) कं सर्पिः न च पित्तप्रकोपनम् ।
कफेऽनिले योनिदोषे च श्वयथौ हितम् (शोफे कम्पे च तद्धितम्) ॥ ९ ॥
पाके लघुष्टं (घृष्णं) वीर्ये च कषायं कफनाशनम् ।
दीपनी (नं) लघु वीर्ये च विद्यादैकशफं घृतम् ॥ १० ॥

स्त्रीघृतम्

चाक्षुष्यमग्निदं स्त्रीणां सर्पिः स्यादतसोपमम् ।
वृद्धिं करोति देहाग्नेर्लघु पाके विषापहम् ॥ ११ ॥

हस्तिनीघृतम्

कषायं बद्धविण्मूत्रं तत्कि (तिक्त) मग्निकरं लघु ।
करेणुजं हन्ति सर्पिः कष्टक्रिमिविशंकरम् (कफकुष्ठविषक्रिमीन्) ॥१२॥

सर्पिःप्रशंसा

आयुर्वृद्धिं वपुरपि दृढं सौकुमार्यं करोति
व्यायामस्त्रीनिधुवनकृतश्रान्तिविच्छेदनीनम् ।
पथ्यं बाल्ये वयसि तरुणे वार्धके चापि पथ्यं
नान्यत्किञ्चिद्भवति पुरुषे सर्पिषः स्थौल्यकारि ॥ १३ ॥
यद्वेदागमवेदिभिर्निगदितं साक्षादिहायुर्नृणां
यद्वैद्यैस्तु रसायनाय कथितं सद्यो जरानाशनम् ।
यत्सारस्वतकल्पकान्ति मतिमत्प्रोक्तं धियः सिद्धये
तत्रैकायनकेतकद्युतिचयप्रायं मुदा स्याद् घृतम् ॥ १४ ॥
वीर्यातिशीतं च गुणे विपाके
स्वादु त्रिदोषेषु रसायनं च ।
तेजोबलायुष्यकरं च मेध्यं
चाक्षुष्यमेतद् घृतमाहुरार्याः ॥ १५ ॥
ओजस्तेजोभिवृद्धिं जनयति सुखदं कान्तिकृत्सम्यगुक्तं
पापालक्ष्मीश्रमघ्नं श्वसनकसनहाऽजीर्णजातज्वरघ्नम् ।
शूलोदावर्तरोगग्रहणिनि च पजा (मदरुजं) नाशयत्याशु पित्तं [पीडां]
वातघ्नं पित्तनाशं स्वरहति भवे शूद्धमे (स्वरकरमगदं क्षुद्धमे)
चैवसेव्ये (व्यम्) ॥ १६ ॥
चाक्षुष्यं वृष्यमायुस्मृतिधृतिकरणं राजयक्ष्माप्रकोपं [विनाशं]
[रूक्षे क्षीणे च पथ्यं वलिपलितहरं सामदोषप्रकोपे ।]
भूतोन्मादप्रमत्ते बहुतिमिरमदे कृत्यपश्रीर [स्यादपस्मार] हारि
सर्वेषां सर्वदैव प्रथितगुणगणं साधु पथ्यं घृतं स्यात् ॥ १७ ॥

सद्यस्कं कृमिपूतं [?] च मूत्रवस्ति विशोधनम् ।
श्लेष्मलं पित्तनाशं च बलपुष्टिविवर्धनम् ॥ १८ ॥
पुराणं तिमिरश्वासपीनसज्वरकासनुत् ।
मूर्छाकुष्ठविषोन्मदग्रहापस्मारनाशनम् ॥ १९ ॥
उग्रगन्धि पुराणं स्याद्दशवर्षोषितं घृतम् ।
लाक्षारसनिभं शीतं तद्धि सर्पग्रहापहम् ॥ २० ॥
मदापस्मारमूर्छायशिरःकर्णाक्षियोनिजान् ।
पुराणं जयति व्याधीन् व्रणशोधनरोपणम् ॥ २१ ॥
अपस्मारग्रहोन्मादवतां शस्तं विशेषतः ।
पूर्वोक्ताश्चाधिकांस्ताश्च [?] गुणास्तदमृतोपमम् ॥ २२ ॥
निरामयानां नवयौवनानां
कृत्वा गवां यच्छत धौतमद्भिः ।
वह्नौ विपक्वं नवनीतनूनं [योग्यं]
योग्यं घृतं तद्गजराजसेवितम् [?] ॥ २३ ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते घृतवर्गः ॥

॥ इदानीं तैलगुणाः ॥

उष्णं विपाके कटुकं सतिक्तं
कफापहं वातनिवारणं च ।
क्रिमीन्निहन्याद्बलभुक्तकारि
तैलं क्रिमिश्लेष्ममरुत्प्रणाशि ॥ १ ॥
तिलतैलमलंकरोति केश्यं
मधुरं तिक्तकषायमुष्णतीक्ष्णम् ।

बलकृत्कफवातजं च [जन्तु] खर्जू
व्रणकण्डूतिहरं च [कान्ति] दायि ॥ २ ॥
कण्डूहरं कान्तिविवर्धनं च
अर्शो [वर्चो] विवृद्धि व्रणरोपणं च ।
तिलस्य जातं खलु यच्च तैलं
बालेषु वृद्धेष्वपि तैल [पथ्य] मेतत् ॥ ३ ॥
न पित्तरोगे न च शोणितोत्थे
पथ्यं ; महावातविकारसंधौ ॥
तिलोद्भवं तैलमुदाहरन्ति
वाताश्रितान् हन्ति समस्तदोषान् ॥ ४ ॥
कटुम्लवीर्यं बहुपित्तकारि
विण्मूत्रसङ्गं कुरुतेऽतिदीप्तिम् ।
पामादिदोषापहरं च तैलं
अभ्यञ्जनं सर्षपसंभवं च ॥ ५ ॥
कटूष्णं सार्षपं तैलं कफशुक्रानिलापहम् ।
तीक्ष्णोष्णं पिच्छलं विस्रं रक्तैरण्डोद्भवं त्वति ॥ ६ ॥
आमवातगजेन्द्राणां शरीरवनचारिणाम् ।
एक एवाग्रणी [जैं] हेता एरण्डस्नेहकेसरी ॥ ८ ॥
कौसुम्भतैलं क्रिमिनाशनं च
तेजोबलं नेत्रविनाशनं च ।
खर्जूश्च केशश्च करोति कोष्ठे [कण्डूं च करोति दृष्टेः]
त्रिदोषलं वापि समीरणघ्नम् ॥ ९ ॥
लेपात्करंजतैलस्य दृष्टिरोगविनाशनम् ।
कुष्ठे च पापभिन्ननां सर्ववातविकारनुत् ॥ १० ॥

आक्षं स्वादु हिमं केश्यं गुरु पित्तानिलापहम् ।
नाप्यु (त्यु) ष्णं निम्बजं तैलं क्रिमिकुष्ठरुजापहम् ॥ ११ ॥
क्षौमं स्नेहमचाक्षुष्यं पित्तकृद्वातनाशनम् ।
आक्षजं कफपित्तघ्नं केश्यं दृक्श्रोत्रतर्पणम् ॥ १२ ॥
अधोभागिकमैरण्डमन्येषां तिलवत्स्मृतम् ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते तैलवर्गः ॥

अथ मधुगुणाः कथ्यन्ते ।

व्रणसा (शो) धनसंधानरोपणं वातलं मधु ।
रूक्षं कषायमधुरं तत्तुल्या मधुशर्करा ॥ १ ॥
त्रिदोषघ्नं मधु प्रोक्तं अन्यस्या श्रीसंनिपातलम् (?) ।
हिक्काश्वासकफच्छर्दिमदतृष्णाविषापहम् ॥ २ ॥
क्षौद्रं जलेन संयुक्तं (अति) स्थौल्ये पिबेन्नरः
कृशो भवति सत्याह (प्राहा) लेखनं तत्र जायते ॥ ३ ॥
लेपे हितं तत्र गुदाङ्कुराणां
गजोद्भवं लेह्यमहोभिवृद्धिः (?) ।
सर्वो गुरुश्चापि रसायनानां
कासापहो वापि मधुप्रयोगः ॥ ४ ॥
मेहे हितं स्यान्मलछर्दिनाशः
हिक्कातिसारे व्रणकुष्ठहन्ता ।
कण्डूव्रणघ्नो व्रणदीपनानां (पीडितानां)
दिव्यामृतं साधु मधुप्रयोगः ॥ ५ ॥

स्थावरं जङ्गमं वापि कृत्रिमं च विषापहम् (विषंहरेत) ।
वलीपलितनिर्मुक्तो देहे तस्मिन् प्रजायते ॥ ६ ॥
क्षतक्षीणे हितं चैव पाडुकामलरोगजित् ।
स्थूल कृष्णो (?) हितं चैव रक्ते वापि हितं च तत् ॥ ७ ॥
पाके स्वादु मधु श्रेष्ठं विपाके दोषसंयुतम् ।
(तन्मधु भूवि रुद्धानां वारीणां मदसंभवम् ॥ ८ ॥
संभवः क्रिमिकीटानां पिप्पली मधुना सह ।
अम्लेन मधुरं स्वादु तन्मधुश्चापि दोषकृत) (?) ॥ ९ ॥

॥ इदानीं इक्षुगुणाः कथ्यन्ते ॥

स्निग्धश्च संतर्पणबृंहणश्च
संजीवनः स्वादुरसः श्रमघ्नः ।
वृष्यश्च पित्तश्रमवातहारी
ह्यन्तर्विदाही कफकृत्सितेक्षुः ॥
तद्वत्सकृष्णो हि भवेद्गुणैश्च
वृष्यो भवेत्तर्पणदाहहन्ता ।
सक्षारकिंचिन्मधुरो रसेन
शोषापहन्ता व्रणशोफकर्ता ॥ २ ॥
पाण्डुको भीरुकश्चैव वाराहश्वेतपोनकः ।
कान्तारस्तापसेक्षुः स्यात्काष्ठेक्षुश्च विचित्रकः ॥ ३ ॥
नेपालो दीर्घपत्रश्च नीलयोरौप्यकोशकृत् ।

इत्येता जातयः स्थूला गुणान् वक्ष्याम्यतः परम् ॥ ४ ॥
सुशीतो मधुरः स्निग्धो बृंहणः श्लेष्मवर्धनः ।
अविदाहिगुरुर्बृष्यः पौण्ड्रको भीरुकस्तथा ॥ ५ ॥
अन्ये तुल्यगुणाः क्वचित्सक्षारो वंशको मतः ।
वंशवच्छेतपौण्ड्रस्तु किञ्चिदुष्णः स वातहा ॥ ६ ॥
कान्तारस्तापसेक्षुः स्याद्वंशकानुगतो मतः ।
एवंगुणस्तु काष्ठेक्षुः स तु वातप्रकोपनः ॥ ७ ॥
सूचीपत्रोनिलापोगेनीलापो (नेपालो) दीर्घपत्रकः ।
वातघ्नाः कफपित्तघ्नाः सकषायविदाहिनः ॥ ८ ॥
कोशाकरो गुडः शीतो रक्तपित्तक्षयापहा ।
अतीव मधुरो मूलो (ले) मध्ये मधुर एव च ॥ ९ ॥
अग्रेषु (ष्वा) मधुरो ज्ञेयः इक्षुरालवणः स्मृतः ।
कफकृच्चाविदाही च रक्तपित्तनिबर्हणः ॥ १० ॥
शर्करासमवीर्यस्तु दन्तनिष्पीडितो रसः ।
गुरुर्विदाही विष्टम्भी यान्त्रिकः परिकीर्तितः ॥ ११ ॥
एको (पक्को) गुरूरसः स्निग्धः सतीक्ष्णः कफवातनुत् ।
फाणितं गुरु मधुरं अभिष्यन्दि च बृंहणम् ॥ १२ ॥
शुक्रं कफकरं चैव पित्तघ्नं च विशेषतः ।
सक्षारो मधुरोऽतिमूत्रबहुलो रक्तस्य संशोधनो
मेदोनिग्रहणस्तु पित्तशमनो वातघ्नविष्टम्भनः ।
श्लेष्माणं जन (येत्) च बृंहणकरो बल्यः सदा स्वास्थ्यकृत्
वातघ्नो विषमोम्लपित्तशमनोऽसेव्योऽतिरेके सदा ॥ १३ ॥

मत्स्यण्डिकादीनां गुणाः

मत्स्यण्डिकायाः खण्डः शर्करपाविमलोन्नरो दिग्धः (१)
गुरुरथ मधुरोत्तरोत्तरपाको वृष्यो रक्तपित्तविनाशकृत् ।
यावती शर्करा प्रोक्ता सर्वदाहप्रणाशिनी ।
रक्तपित्तप्रशमनी छर्दिमूर्छा तृषापहा ॥ १५ ॥
रूक्षो मधूकपुष्पोत्थः फाणितो वातपित्तकृत् ।
कफघ्नो मधुरः पाके विपाके वस्तिशोधनः ॥ १६ ॥
गुडशर्करया तुल्या वस्तिशोधनपाचनी ।
पित्तसंशमनी चैव रक्तपित्तनिबर्हिणी ॥ १७ ॥
मधुरा शर्करा चैव हिध्मातीसारनाशिनी ।
रूक्षा विच्छेदनी चैव कषाया मधुरापि च ॥ १८ ॥

इक्षुप्रशंसा, तद्भेदाश्च ।

वृष्यः शीतोष्णपित्तं शमयति मधुरो बृंहणः श्लेष्मकारी ।
स्निग्धो हृद्यस्सरश्च श्रमशमनपटुर्मूत्रशुद्धिं करोति ।
मेदोवृद्धिं (विधत्ते) वर्धते शमयति च मलान् तर्पणं चेन्द्रियाणां
दंतौ नि (दन्तैर्नि) ष्पीड्य साक्षादमृतमयरसो (सं)
भक्षयेदिक्षुदंडः (डं) ॥ १९ ॥
कान्तारो रक्तवर्णः स्यात्कोशाकारस्तथैव च ।
श्वेतस्तु पौण्ड्रको ज्ञेयः त्रयः श्रेष्ठास्तथेक्षवः ॥
मधुरो मूलभागे (गे) स्यान्मध्ये मधुर एव च ।
अग्रभागे पुनस्तस्य इक्षोः स्याल्लवणो लघु ॥ २० ॥

भक्षयेदिक्षुकं काले भोजनस्याग्रतो नरः ।
स्वभावान्मधुरोऽप्येष शुक्रो (भुक्ते) वातप्रकोपनः ॥ २१ ॥
विदाही विष्टम्भी गुरुरतितरां शोषशमनः
कषायोऽलंकुर्यात्पवनजनन छर्दिकरणः ।
धृतः किञ्चित्कालं सकलसहमूलाग्रदलना-
द्विदाही तेनायं भवति [न] हितो यान्त्रिकरसः ॥ २२ ॥
मूलमध्यदलनाच्च तत्क्षणात्सी [पी] यते यदि तु यान्त्रिको रसः ।
वातपित्तशमनस्तदा भवेत्तर्पणश्च मलमूत्रशोधनः ॥ २४ ॥

गुडादीनां गुणाः ।

पित्तघ्नः पवनापहो रुचि [चि] करो हृद्यस्त्रिदोषापहः
संयोगेन विशेषतो ज्वरहरः संतापशान्तिप्रदः ।
विण्मूत्रामयनाशनोऽग्निजननः कण्डुप्रमेहांति [त] कृत
स्निग्धस्वादुरसो लघुः श्रमहरः पथ्यः पुराणो गुडः ॥ २५ ॥
दाहं निवारयति पित्तमपाकरोति
तृष्णां छिनत्ति विनिहन्ति च मोहमूर्छाम् ।
शोषं विघट्टयति तर्पयतीन्द्रियाणि
शीतः सदा समधुरः खलु सिद्धखण्डः ॥ २६ ॥
तृष्णामोहतृषास्यशोषशनी दाहज्वरध्वंसनी
श्वासच्छर्दिमदाय (त्ययक्षम) मलहरी हृद्या च संतर्पणी ।
क्षीणे रेतसि पावके च विषमे क्षीणे क्षते दुर्बले
दुर्वारेऽपि च रक्तपित्तकगदे सेव्या सदा शर्करा ॥ २७ ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते इक्षुवर्गः ॥

॥ इदानीं मद्यगुणाः कथ्यन्ते ॥

संदीपनं मद्यमतीव तीक्ष्णं
उष्णं च तृष्टां (तृष्णा) प्रदपुष्टिदं च ।
सुस्वादु तिक्तं कटुकं तथाऽम्लं
जम्बूरसं सुस्वदनीयमेतत् ॥ १ ॥
काप्योपं ? रसभेदनं बलकरं सश्वासकासापहं
वर्ष्यं (वृष्यं) चैव लघूष्णदुष्टजरणं निद्राभिवृद्धिप्रदम् ।
पित्तासृक्कफसारके च विषमे काश्यें तथा पीनसे
रूक्षं श्रोत्र (स्रोत) विशोधनं रुचिकरं वातादिसंशोषणम् ॥ २ ॥
(श्लेष्माणं विनिहन्ति युक्तमनिशं सेव्यं सदा प्राणिना)
कृशे स्थूले हितं रूक्षं सूक्ष्मं श्रोतो (स्रोतो) विशोधनम् ।
वातश्लेष्महरं पुत्वया (युक्त्या) पीतं विषवदन्यथा ॥ ३ ॥
गुरुत्व (तद्) दोषजननं नवं, जीर्णमतोऽन्यथा ।
नात्यर्थतीक्ष्णमृद्वल्पसंभारं कलुषं न च ।

अथ सुराया गुणाः ।

गुल्मोदरार्शोग्रहणीशोफहृत्स्नेहनी गुरुः ।
सुरानिलघ्नी मेदोऽसृक्स्तन्यमूत्रकफाप (व) हा ॥

अथ वारुण्या गुणाः ।

तद्वरुणा वारुणी हृद्या लघुतीक्ष्णा निहन्ति च ।
शूलकासारुचिश्वासविबन्धाध्मानपीनसान् ॥ ६ ॥
ग्राह्युष्णानलदा रूक्षा पाचनी शोफनाशनी ।

अथ पथ्याबिभीतकसुरा ।

नात्यर्थं प्रमदा लाघ्व्यां (घ्वी) यथा (पथ्या) बैभीतिकी सुरा ॥ ७ ॥
व्रणे पाण्ड्वामये कुष्ठे न चात्यर्थं विरुध्यते ।

अथ यवसुरा ।

विष्टम्भिनी यवसुरा गुर्वी रूक्षा त्रिदोषला ॥ ८ ॥

अथ अरिष्टगुणाः ।

यथाद्रव्यगुणोऽरिष्टः सर्वमद्यगुणाधिकः ।
ग्रहणीपाण्डुकुष्ठार्शःशोषशोकोदरज्वरान् ॥ ९ ॥
हन्ति गुल्मक्रि (मि) मी लोहः (प्लीहः) कषायकटुवातलः ।
माद्वीकं लेखनं हृद्यं नात्युष्णं मधुरं सरम् ॥ १० ॥
क (अ) ल्पपित्तानिलं पाण्डुमेहार्शःक्रिमिनाशनम् ।
(सृष्ट) दृष्टिमूत्रस (श) क्रद्वातो गौडस्तर्पणदीपनः ॥ ११ ॥
भृशोष्णतीक्ष्णरूक्षाम्लं हृद्यं रुचिकरं सरम् ॥ १५ ॥
दीपनं शिशिरस्पर्शं पाण्डुक्रिमिविनाशनम् ।
गुडेषु (क्षु) मधुमाध्वीकसूक्तं लघु यथोत्तरम् ॥ १६ ॥
कन्दमूलफलाद्यं च तद्वद्विद्यात्तदासुतम् ।
शाण्डाकी चासुते (तं) चान्यत् कालाम्लं रोचनं लघु ॥

॥ इति मद्यवर्गः ॥

इदानीं काञ्जिकवर्गः ॥

धान्याम्लं भेदि तीक्ष्णं सुरभि लघुतरं शो (सो) ष्णसंस्पर्शशीतं
रूक्षं चैव क्रमघ्नं श्रमहरविषदं वस्तिसंशोधनं च ।
शस्तं वास्थापनं स्यात् लघु विषशमनं श्वासरोगापनोदि
गण्डूषो धारणे स्यान्मुखगदनिवहे गन्धनिर्नाशनं च ।
धान्याम्लं भेदि तीक्ष्णोष्णं पित्तकृत् स्पर्शशीतलम् ।
श्रमक्रमहरं रुच्यं दीपनं वस्तिशोधनम् ॥ १ ॥

इति काञ्जिकवर्गः ॥

॥ अथ मूत्रवर्गः ॥

औष्ट्रं (मूत्रं) गोऽजाविमहिषीगजाश्वोष्ट्रखरोद्भवम् ।
(पित्तलं रूक्षतीक्ष्णोष्णं लवणानुरसं कटु ।
कृमिशोफोदरानाहशूलपाण्डुकफानिलान् ।
गुल्मारुचिविषश्वित्रकुष्ठार्शांसि जयेल्लघु ।)
औष्ट्रं गोजाविनारं हयगजमहिषीमूत्रवर्गः खरोष्णा (राणां)
तिक्तं तीक्ष्णं लघूष्णं सलवणसुरसं पित्तलं भेदि रूक्षम् ।
हृद्यं रुच्यं क्रिमिघ्नं हुतवहजननं कुष्ठमेहौ विनाशी (शि)
गुल्मानाहार्शशूलानिलकफविषजित् शोफपाण्डूदरघ्नम् ॥
मूत्रं तथाष्टादशकुष्ठशोफपाण्डूदरोन्मादकफामयघ्नम् ।
सेव्यं निदर्शा (?) विकारमेतत् रूक्षं तथाम्लं क्रिमिषु प्रशस्तम् ।

॥ इति मूत्रवर्गः ॥

॥ अथ धान्यवर्गः ॥

स्निग्धौ वातहरस्त्विदोषशमनः पथ्यः सदा प्राणिनां
श्रेष्ठः पौष्टिक [श्रेष्ठो व्रीहिषु षष्टिकः] श्रमहरः कृच्छ्रादिदोषापहा ।
गौर (श्वा) श्वासितगौरतोऽपि नितरां सेव्यः करोत्युच्चकैः
भुक्त (शुक्रं) श्वासहरस्तथा श्रमहरः कासादिदोषापहा ॥ १ ॥
रसे पाके स्वादुः पवनकफपित्तोपशमनः
ज्वरेऽजीर्णे पथ्यः सकलजवरक्षाभहरणः (?) ।
शिशूनां वृद्धानां युवतिसुकुमारातिस (सु) खिनां
अयं सेव्यो राजा भवति हि महाशालिरमलः ॥ २ ॥
धान्यं वापितमुत्तमं तदखिलं (छि) छन्नोद्भवं मध्यमं
ज्ञेयं यदवर्गपित्तं (तद्यदवापितं) तदधमं निस्सारदोषप्रदम् ॥ ३ ॥
दग्धा यद्भविच्पेष्यं तेथ (?) विपिने यद्वापिताः शालयः
एते छिन्नभवा भवन्ति खलु ते विण्मूत्रबन्धप्रदाः ॥ ३ ॥
देशे देशे तु जातांश्च नानावर्णांश्च शालयः ।
तेषां स्वतः प्रधानोऽसौ त्रिदोषशमनः परः ॥ ४ ॥
रक्तो भीरुकपुंडरीककलमस्तूर्णो महापुष्पकः
दीर्घः काञ्चनहायनोऽसितशि (स्रि) तः पुष्पाण्डजः पाण्डुकः ॥
सारास्यास्तपनीयकाः शकुनको रोधस्तु सौगन्धिकः
धानाद्याः सपतङ्गिदूषकयुता हृद्याः शुभाः शालयः ॥ ५ ॥
सुसभाः (?) पाचनदीपना बलकरा स्निग्धास्त्रिदोषापहाः
शुक्रश्लेष्मविवर्धना रुचिकराः संदीपनास्तर्पणाः ।

पथ्याः सर्वगदे हिताः श्रमहराः क्षुत्तृड्भ्रमध्वंसिनः
श्रेष्ठा व्रीहिषु षष्टिकाः कलप (म) का रक्ता महाशालयः ॥ ६ ॥
रोचनास्तर्पणा हृद्या दीप्तस्य (?) पाचनाः ।
गुरवो बृंहणाः पथ्या नानाजातीयशालयः ॥ ७ ॥
जगरोमधयेरो (?) हृद्यः स्वादुसंजीवनो लघुः ।
वृष्यो बलप्रदो हन्यात् सघृतोऽसौ मलत्रयम् ॥ ८ ॥
राजानं (न्नं) कफवातघ्नं स्वादु पित्तनिवारणम् ।
रूपशुक्रमहातेजःसत्वशुद्धिबलप्रदं ॥ ९ ॥
कृष्टि [ष्ण] शालि [स्ति] त्रिदोषघ्नो मधुरः कार्श्यहा तथा ।
पित्तघ्नः पिच्छलः शुक्ररूपवर्णबलप्रदः ॥ १० ॥
एते शालिगुणाः प्रोक्ता ज्ञातव्याः शास्त्रकोविदैः ।
सर्वं धनतृणानां (न्नं) च कुष्ठरोगविनाशनम् ॥ ११ ॥
सर्वव्याधिहरं शीघ्रं मुखशोधनमेव च ।
धान्ये श्रेष्ठं षष्टिकं राजभोज्यं मांसे त्वाजं तैत्तिरीकं हितं स्यात् ।
पानीयं स्यात्कृष्णमृत्स्नासमेतं क्षीराज्यादौ गव्यमादौ प्रशस्तम् ॥

॥ इति शालिवर्गः ॥

उष्णारूक्षव (त) राः कषायमधुराः पाके लघुत्वादि (धि) काः
श्लेष्मघ्नाः पवनादिपित्तजनकाः विष्टम्भिनः सर्वदा ।
रोमाकादिकधान्यलक्षणमिदं प्रोक्तं नृणामग्रतः
सम्यक् वै बलशाकसद्रवगुडैः पश्चात्क्रमः संस्थितः ॥ (?)

॥ इति धान्यवर्गः ॥

॥ अथ शिम्बिधान्यगुणाः कथ्यन्ते ॥

तत्रादौ मुद्गगुणाः ।

मुद्गः पित्तकफापहो व्रणहरः कंवा (ठा) मयघ्नो लघुः
पथ्यो वातविरिक्तजन्तुषु तथा नेत्रामये सर्वदा ।
नैवाध्मानकरस्तथानिलहरो मन्दानि (व) ले शस्यते
सूपानामपि चोत्तमः स्वरकरो मूत्रामयच्छेदनः ॥

अथ माषः ।

माषः स्निग्धो बलमलकरः शोषणः श्लेष्मकारी
वीर्ये चोष्णो झटिति कुरुते रक्तपित्तप्रकोपम् ।
हन्याद्वातं गुरुरतिरसो रोचको भक्ष (क्ष्य) माणः
स्वादुर्नित्यं श्रमसुखजुषां जीवनीयो नराणाम् ॥ १ ॥
माषो गुरुर्भिन्नपुरीषमूत्रः
स्निग्धोष्णवीर्योमधुरोऽनिलघ्नः ।
संतर्पणस्तन्यकरो विशेषात्
(बलप्रदः शुक्रकफावहश्च)
कषायभावान्न पुरीषभेदी
न मूत्रलो मे (नै) व बलासकर्ता (?) ॥
स्वादुर्विपाके मधुरोतिसान्द्रः
संतर्पणःस्तन्यरुचिप्रदश्च ।
माषैः समानं फलमात्मगुप्त (प्त) मूचुश्च काकाण्डफलं तथैव ॥

॥ इति माषगुणाः ॥

अथ कुलत्थगुणाः

(उ) कृष्णःकुलुत्थो रसतः कषायः ।
कटुर्विपाके कफुमारुतघ्नः ॥
श्रुता (शुक्रा) श्मरीगुल्मनिषूदनश्च
संग्राहकः पीनसकासहारी ॥ १ ॥
आनाहमेदोगुदकीलहिक्का-
श्वासापहः शोणितपित्तकृच्च ।
कफस्य हन्ता नयनामयघ्नो
विशेषतो वन्यकुलित्थ (उ) युक्तः ॥ १ ॥

अथ राजमाषगुणाः ।

राजमाषः सगो रुच्यः कफशुक्र (क्राम्ल) सपित्तकृत् ।
सुस्वादुर्वातलो रूक्षः कषायोऽपि महागुरुः ॥ ३ ॥
रूक्षः कषायो विषशोकशुक्र-
वलासदृष्टिक्षयवृद्धिकारी ।
कटुर्विपाके मधुरश्च शिम्बिः
प्रवृद्धविण्मूत्र (मा) रुतपित्तलश्च ॥ ४ ॥
सितासितः पीतकरक्तवर्णा
भवन्ति वै नैकविधास्तु शिबिं (म्ब्यः) : ॥

अथ तिलगुणाः ।

ईषत्कषायो मधुरः सतिक्तो (क्तः)
संग्राहकः पित्तकरस्तथोष्णः ॥ ॥
तिलो विपाके मधुरो बलिष्ठः
स्निग्धो व्रणालेपनपथ्य उक्तः ॥

दन्त्योऽग्निमेधाजननोऽल्पमूत्रः
स्तन्योऽथ केश्योऽनिलहा गुरुश्च ।
तिलेषु सर्पिष्वासित [सर्वेष्वासितः] प्रधानो
मेध्यः सितो हीनतरस्तथान्यः ॥
दन्त्यो वर्णबलाग्नि [बुद्धि] जननः स्तन्योऽनिलघ्नो गुरुः
स्निग्धः पित्तकरोऽल्पमूत्रकरणः केश्यातिपथ्यो व्रणे ।
ग्राह्युष्णो धृतिकृत् कषायमधुरस्तिक्तो विपाके कटुः
कृष्णः पथ्यतमोऽसितोऽल्परहितो [गुणदः] हीनास्तथान्ये तिलाः ॥१॥

इति तिलः ॥

॥ अथ यवगुणाः कथ्यन्ते ॥

यवः कषायो मधुरो हिमश्च
कटुर्विपाके कफपित्तहारः ।
व्रणेषु पथ्यस्तिलवच्च नित्यं
प्रबद्धमूत्रो बहुवातवर्च [र्चा]: ॥ १ ॥
स्थैर्याग्निधातुस्वरवर्णकृच्च
सपिच्छलस्थूलविलेखनश्च ।
मेदोमरुत्तृट् [ड्] हरणो विरूक्षः
प्रसादनः शोणितपित्तयोश्च ॥ २ ॥
एभिर्गुणैर्हीनमतश्च नित्यं
विद्याद्यवेभ्योन्यथ [य] वानशेषैः ।

यवः कषायो मधुरः सशीतो मेहे हितः पित्तकफामयघ्नः ।
प्रसृष्टवर्चोऽन्ययवः सबल्यो बल्यश्च वृष्यश्च मले हितश्च ॥ ३ ॥
शीतः कषायः सुरसश्च रूक्षो
मेहक्रिमिश्लेष्मविषापहश्च ।
माधुर्ययुक्तो बलवांस्तथैव
पित्तापहो वेणुयवः प्रदिष्टः ॥ ४ ॥

इति वेणुयवः ॥

अथ गोधूमगुणाः ।

गोधूम उक्तो मधुरो गुरुश्च
बल्यः स्थिरः शुक्ररुचिप्रदश्च
स्निग्धोऽ [ति] सि शीतोऽनिलपीतहारी [पित्तहन्ता]
संधानकृच्छ्लाश्महरः सरश्च ॥ १ ॥
स्निग्धस्वादुरसो विपाकमधुरः प्रायेण चामाश्रयः
बल्यः शीतकरः सरो रुचिकरः संधानकारी गुरुः ।
शुक्रश्लेष्मविवर्धनो धृतिकरः पित्तानिलध्वंसकृत
गोधूमस्तु मनोहरः स्थिरकरः श्वेतो विकारापहा ॥ २ ॥

अथ कुसुम्भगुणाः ।

कटुर्विपाके कटुकः कफघ्नो
विदाहको वातहरः कुसुम्भः ॥

अथ सिद्धार्थकगुणाः ।

उष्णस्तथा स्वादुरसोऽनिलघ्नः
पित्तोल्बणः स्यात्कटुको विपाके ।
पाके रसे वापि कटुः प्रदिष्टः
सिद्धार्थकः शोणितपित्तकर्ता ॥ १ ॥
तीक्ष्णोष्णवीर्यः कफमारुतघ्न-
स्तथाविधश्चासितसर्षपोऽपि

अथ आढकीगुणाः ।

[आढक्यः] कफमारुतप्रशमना वीर्येण चोष्णास्तथा
हृत्पृष्ठोदरमारुतामप [य] रुजामेदोरुजं कुर्वते ।
कासश्वासवमीतृषाज्वरहराः पथ्याश्च कण्डूरुजा
या [पा] माकुष्ठभगन्दरेषु न तथा रुच्यास्तु पथ्या भृशम् ॥ १ ॥
आढकी कफवातघ्नी ईषन्मारुतकोपिनी ॥ २ ॥
तस्यैतद्विदं [विधं] भोज्यं स्वादु विष्टम्भनं गुरु ।
दीपनं कफपित्तघ्नं सर्वमेहप्रणाशनम् ॥ ३ ॥
हृद्यं वासुखं दत्वा आढकी मुद्गपूषकः । [?] सूरीचैकदनं ॥ [?]

मुद्गपू [यू] ष गुणाः ॥

ज्वरहरणबलाढ्यं रक्तपित्तप्रणाशं
विदधति निपुणास्ते मुद्गपू [यू] षं प्रशस्तम् ।
अनिलमपि निहन्ति स्नेहसंस्कारयुक्तं
शमयति तनुदाहं सर्वरोगेषु शस्तम् ॥ १ ॥

पित्तज्वरार्तिशमनं लघुमुद्ग [यू] पूषं
संतापहारि तदरोचकनाशनं च ।
रक्तप्रसादनमिदं यदि सैन्धवेन
युक्तं तदा भवति सर्वरुजापहारि ॥ २ ॥
व्यपगतमलदोषाः प्राणिनः क्षीणमात्रा
अधिकतरतृषार्ता ये च घर्मप्रतप्ताः ।
ज्वलनमुखविदग्धा येऽतिसाराभिभूताः
पुनरिहमनुजास्ते मुदुपू [यू] षस्य योग्याः ॥ ३ ॥

कुलित्थपूष (यूष) गुणाः ॥

वीर्ये चोलाः [ष्णाः] कुलित्थाः कफपवनहराः पित्तरक्तप्रदाश्च
पाकेऽम्लाः श्वासकासोदरहृदयशिरोवस्तिशूलापहाः स्युः ।
मूत्राघातप्रमेहाश्मरिभृशदमनाः शुक्रविच्छेदनाश्च
श्रेष्ठा दुर्नामकुष्ठश्वयथुगुदयकृद्गुल्मतूनीगदेषु ॥ १ ॥

मसूरपू (यू) षगुणाः ॥

मासूरा लघवोऽतिरूक्षविशदाश्चाक्षुष्यमूत्रापहाः
श्लेष्मापीन [पित्त] निबर्हणा रुचिकरा वातामयान् कारकाः ।
विष्टम्भं जनयन्ति कोष्ठधमने [नं] कृच्छ्राश्मरीछेदनं
सर्वे पित्तविकारजेषु [वि] हिता हृद्याश्च मासूर्यकाः ॥ १ ॥

अथ कलायगुणाः ।

प्रसु (भृ) तवा (तं) कुत (?) कुरुतेऽतिरूक्षः
कफापहः पित्तहरो नितान्तम् ।
रुचिप्रदो (दः) शूलकरो नराणां
आमानुबन्धी कथितः कलाप (य) : ॥ १ ॥

॥ अथ चणकगुणाः कथ्यन्ते ॥

रूक्षा वातकराः प्रमेहशमनाः कृच्छ्राश्मरीछेदनाः
विड्भेदं जनयन्ति पित्तशमना आध्मानरोगप्रदाः ।
कण्ठध्वंसहराः सुभक्षसुखदाः भुक्तारुचिच्छेदनाः
बल्या वर्णकरा विभुक्तचणकाः पुंसश्च नैते हिताः ॥ १ ॥

इति शुष्कचणकाः ॥

आर्द्रा वृष्यतमा बल्याः श्लेष्मला रुचिकारकाः
वातपित्तहराः शीता मूत्रकृच्छ्रनिवारणाः ॥ २ ॥

इति आर्द्रचणकाः ॥

लघवो भृष्टचणकाः श्लमकृमकराः पराः ।
छर्दिघ्ना रोचना निद्रासुखपुष्टिबलप्रदाः ॥ ३ ॥

इति भृष्टचणकाः ॥

असितचणकयूषो दाहनाशं विधत्ते
प्रबलमहितलब्धं (?) सर्वमेहप्रणाशम् ।
दहनमरिचयोगाद्वातरोगापहारी
विदलजलविपक्वः सर्वदोषप्रयाति (णाशी) ॥ ४ ॥

इति कृष्णचणकाः ॥

पित्तघ्नाश्चणकाः श्वेताः श्लेष्मवातप्रकोप (णा) नाः ।
बलकृन्मलविष्टम्भमन्दाग्निश्चापि संयुतम् (?) ॥ ५ ॥
चणोदकं चन्द्रमरीचिशीतलं
प्रमेहपित्तास्रुजापहारि ॥
पुष्टिप्रदं तैल (नैज) गुणं हि पाके
संतर्पणं साधुजनमाधुरीयकम् (मञ्जुलमाधुरीकम्) ॥ ६ ॥

इति श्वेतचणकाः ॥

श्यामाकाः कोद्रवा येऽन्ये ये चान्येऽनु च शिम्बिकाः ।
अपथ्यास्ते न शंसन्ति [शस्यन्ते] सुखिनां निरुजां तथा ॥ १ ॥
यद्यज्जीर्यत्यतिक्षिप्रं तत्तल्लघुतरं स्मृतम् ।
यवगोधूममाषाश्च तिलाश्चापि नवा हिताः ॥ २ ॥

॥ इति धान्यवर्गः ॥

॥ शुभं भवतु लेखकवाचकयोः ॥ श्रीसाम्बसदाशिवाय नमः ॥

॥ श्रीरस्तु ॥

अथ पक्कान्नगुणाः ॥

गोधूमफेणिका ।

सलघुरुचिरकामा फेणिकातिप्रशस्ता
बलयति लघुजीरा छर्दिनाशं करोति ।
बदलविमुखमर्धं [?] चाम्लपित्ते विदाहं
जठरभरणयोग्या गोधुमैः संप्रयुक्ता ॥ १ ॥

फेणिया ॥

गुरवो बृंहणाः स्निग्धा बल्याः शुक्रकराः पराः ।
स्त्रीषु हर्षं प्रयच्छन्ति माषपिष्टिकसंभवाः ॥ २ ॥

गोधूमासांजीलाहुः ॥ [डुः]

तोयाज्येन विमर्दितं समसितं कृत्वा सुतप्तं तथा
खण्डाज्येन पचेद्धुताशनमृदौ कृत्वा सुबन्धं ततः ।
कर्पूरैर्मरिचैः ससैन्धवमथो शश्वच्चतुर्जातकैः
पुष्पालम्बमिति ब्रुवन्ति मुनयो नाम्ना महामोदकम् ॥ ३ ॥
वृष्यास्तु कन्दर्पकरा यथाग्नि
संवर्धिताः प्रीतिरुचिप्रदायकाः ।
वातं सपित्तं प्रहरन्ति भुक्ताः
सन्मोदका मोदकरा नराणाम् ॥ ४ ॥

मोदको गुरुरतीव वृष्यकः
श्लेष्मलश्चिरविपाकतस्तथा ।
मन्दमग्नि जनयेच्च कोष्टभृत्व (?)
मोदकोऽधिकबलप्रदः सदा ॥ ५ ॥

अमृतफलम् ॥

शमयति बहु पित्तं श्लेष्मकोपं करोति
जनयति जठराग्निं वातरोगान्निहन्ति ।
सुरतजनितखेदं तत्क्षणादेव हन्या
दमृतफलमुदारं चारु शंसन्ति खे (वै) द्याः ॥ ६ ॥
शमयत्यर्शःकृच्छ्रान् हरति सवातं तथा पित्तम् ॥ ७ ॥

कापूरपडीया ॥

रुच्या बल्या बलमलकरा हृद्यगन्धा स्थिरा च
तेजो वर्णं वपुषि कुरुते शुक्रवृद्धिं करोति ।
मेदोवृद्धिं जनयतितरां पित्तरोगे प्रशस्तं
सर्पिःपक्कागुरुमधुयुता एलया सप्रयुक्ता ॥ ८ ॥
कर्पूराद्या विदलनकरा राजयक्ष्मापहन्त्री
विश्वस्यैषा हितकरतमल्कादिनी (?) भक्षणीया ॥
घारिकिंडुरिकापूपवटिका वटकादयः ।
वृष्यका रोचका वल्या गुरवः स्युः स्वयोनिवत् ॥ ९ ॥

इन्द्रारिका ॥

इन्द्रारिका ॥

वृष्या रोचनदीपनी बलकरी गुर्वी अभिष्यन्दिनी
प्राणैस्तर्पणकारिणी रसवती श्लेष्माणमाबिभ्रती ।
सावा (मा) नाहविबन्धगुल्मशमनी पित्तास्रविच्छेदिनी
स्नेहेनापि सुपूरिता च सततं (भक्ष्ये) क्ष क्षेयमिन्द्रारिका ॥

घृतपूरम् ॥

घृतपूरं बलकरं वृष्यं मधुरशीतलम् ।
हन्ति वातं रक्तपित्तं श्लेष्मलं च विशेषतः ॥

साडिया (भा०) ॥

क्षारखर्जूरिका स्निग्धा शुक्रमांसबलप्रदा ।
बल्या रतिकरा हृद्या छर्द्यरोचकनाशनी ॥

॥ क्षीरवटिका ॥

सुस्निग्धा वटिका च दुग्धमृदिता कान्त्यै च सौख्यप्रदा
तृष्णाशक्तिकरी श्रमप्रशमनी मन्दाग्नये दुर्जरा ॥
पित्तास्रं च विनाशयेत्तु सततं भक्ष्या सुपुष्टिप्रदा
प्रोक्तेयं वटिका घृतप्लुतकृता कामाग्निसंदीपनी ॥ १३ ॥

तैलपक्वक्षीरवटिका ॥

सुस्निग्धाः क्षीरवटकाः कान्तिसौख्यबलप्रदाः ।
वातघ्नास्तैलपक्वास्ते वटका मांससंभवाः ॥ १४ ॥

मुद्गवटकाः । (भा०)

मूद्गजातास्तु ये केचित् लघवो रुचिकारकाः ।

चणकादिकृताः ।

दुर्जरा लघवो रूक्षाः चणकादिकृता मताः ॥ १५ ॥

काञ्जीकवटकाः ॥

काञ्जिके रुचिनिक्षिप्ता वटका मांससंभवाः ।
वातघ्ना रोचका हृद्याः कफपित्तप्रकोपनाः ॥ १६ ॥

राजिकाचूर्णसंस्कृतः ।

राजीचूर्णे विमिश्रः कफपवनहरो रोचनो दीपनः स्या-
न्मन्दाग्निध्वंसकर्त्ता मलविषशमनो जारयेत्सर्वान्नम् ।
किंवा तोयैर्विमिश्रो गुडलवणयुतः पित्तरक्तादिहन्ता
तृष्णामूर्छालि [मि] घातज्वरपवनहरः क्षुद्रोगस्य हन्ता ॥ १७ ॥
तक्रं कोमलशृङ्गबेरकलिकाकुस्तुंबुरीसंयुतं
युक्त्यावर्तितमर्धशोषमपरं भाण्डे सुधूपावृते ।
हवा [?] तक्रमनोहराश्च वटकास्तेषां रुचिं मार्दवं
स्वादं सौरभमग्रुद्वहन्त्यहरहः तान्वेत्ति विश्वम्भरा ॥ १८ ॥

अम्लवटकः ॥

अजाजीव्राह्मीकार्द्रकमरिचसिन्धूत्थभरितः
सुपाकः स्वादीयान् दधिमथिततालीविरचितः ।

कृतैलासंवासः क्वथितमथिते स्वैरमुषितः
विहन्ताऽसौ साक्षादरुचितरुजामम्लवटकः ॥ १९ ॥

वटकप्रकाराः ।

कूष्माण्डार्धमरीचे सिंधूत्थमेथिकासहितैः ।
पिष्टैर्माषदलोत्थैर्विहिता वटकाश्च वटिकाश्च ॥ २० ॥

कोहलवडाः (भा०) ॥

गोधूममण्डकाः ॥

श्लक्ष्णं गोधूमचूर्णं शरपिहितमुखं स्वादुतोयेन सिक्तं
संमर्द्यं सुन्दरीभिर्घनपरिलुलितं गोलकं सूक्ष्मपिष्टैः ।
अन्तः पात्रे सुतप्ते करयुगरचिता मण्डकाः श्वेतदीर्घा
निक्षिप्ता भाजनेषु चिमिचिमिरमिताः पुष्टयन्तः सुसिद्धाः ॥ २१ ॥
ते भोज्या भक्तयुक्त्या परिवृतसहिता मुद्गयूषे विमिश्रा
आढक्यैर्वा मसूरैः घृतपिशितरसैर्जांगलानूपमांसैः ।
काले वासन्तपूर्वे प्रहरयुगमुखे भोजनं नित्यपथ्यं
रात्रौ क्षीराज्ययुक्ता सलिल (ललित) नरपतेर्भोजनं ग्रीष्मकाले ॥ २२॥
गोधूममण्डका रुच्या लघवश्चोष्णदीपनाः ।

माण्डेपातिया (भा०) ॥

मण्डका मण्डिकाश्चैव पथ्या अंगारपाचिताः ॥ २३ ॥
अत्युष्णा मण्डका पथ्या अतिशीता गुरुः स्मृता ।

कुक्कूलकर्परभ्राष्ट्रकन्दाङ्गरे विपाचितान् ॥ २४ ॥
(एकयोनींल्लघून् विद्यादपूपानुत्तरोत्तरम्)
रक्तघ्ना पित्तकोपि च स्वादुर्मारुतनाशिनी । (१)
वृष्णी दीपनी वृष्या गोधूमांगारपाचिता ॥ २६॥ (१)

अथ वटकादिभक्ष्याणां गुणाः ॥

बाह्लीजैर्मारिचैर्लवणपुडु (लालवणपृथु) तरैरार्द्रकैः पूर्णगर्भः
स्विन्नः स्वादुः सुगन्धिः परिमलबहुलः कोमलः कुङ्कुमाभः ।
श्लिष्टो दन्तान्तराले मुरुमुरुकुरुते व्यक्तशब्दं यथा वा
धन्योऽसौ यत्कपोले प्रविशति वटकः कान्तया प्रीतिदत्तः ॥ २७ ॥

कोरवडा (भा०) ॥

दधिवटकाः ॥

शालिपिष्टदधिखण्डसंयुता दध्न एव वटकेषु कीर्तिताः ।
घोरवातशमना रुचिप्रदाः पित्तमप्यपहरन्ति दारुणम् ॥ २८ ॥

चणकादिकृताः ।

दुर्जरं चणकादीनां वह्निमान्द्यकरं परम् ।
लघु रुच्यारिनजननं दद्यान्माषादिपूरणम् ॥ २९ ॥
मधुरं मधुराम्लं तत्तदेव प्रकरोति च ।
कफप्रकोपजननं चाणक्यं पूरणं स्मृतम् ॥ ३० ॥

वेङ्गणी (भा०) ॥

गोधूमचूर्णघनवेष्टितमाषमुद्ग-
पिष्टं सुपक्वमिति वेष्टनिका वदन्ति ।

तां भक्षयेदतिबलां लभते (रमते) मनुष्य-
स्तैलेन वा सह घृतेन सुगन्धिना वा ॥ ३१ ॥
तावद्वर्गोऽत्र भक्ष्याणो (णां) स्वदते साध्यतेऽपि च ।
उष्णोष्णाः सर्पिषा स्नाता यावच्चाङ्गारपाचिताः ॥ ३२ ॥
गुडगोधूमयोर्मिश्रं तैलपक्वान्नभक्षणम् ।
करोति श्लेष्मपित्तं च मारुतं चापकर्षति ॥३३॥ तैलवडिया (भा०)॥

लघवः पर्य (र्प) टा रुच्याः कफघ्नाः शालिसंभवाः ।
गुरवो रोचकाश्चैव शालिमुद्गादिसंभवाः ॥ ३४॥
शालिमुद्गपापड (भा०)॥

विष्टम्भी पायसो बल्यो मेदःकफकरो गुरुः ।
कफपित्तकरी बल्या कृशराऽनिलनाशिनी ॥ ३५ ॥
तैले विपक्वा वटिकाश्च शालिभिः सुदुर्जरा रोचनभक्षणाश्च ।
कफप्रकोपं जनयन्ति सद्यो विशेषतः कूरवडा विशीर्णाः ॥ ३६ ॥
कूरवडाः (भा०)॥

सक्तवो बृंहणा वृष्याः तृष्णापित्तकफापहाः ।
रुच्याः सद्यो बलकरा मेदिनः पवनापहाः ॥ ३७ ॥ सातू (भा०)॥

संधानकृत्पिष्टमन्नं तण्डुलाः कृमिहेतवः ।
सुदुर्जरःस्वादुरसो बृहणस्तंडुलोद्भवः ॥ ३८ ॥ तण्डुलपीढ (भा०) ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते कृतान्नवर्गः ॥

॥ अथ फलानां गुणाः कथ्यन्ते ॥

तत्रादौ दाडिमस्य गुणाः ॥

त्रिदोषशमनं पथ्यं वृष्यं मधुरशीतलम् ।
छर्द्यरोचकतृष्णाघ्नं शोफपित्तज्वरापहम् ॥ १ ॥

दाहशिक्तस्त (पित्तप्र) शमनं सर्वरोगविनाशनम् ।
बलवर्णकरं हृद्यं सुपक्वं दाडिमीफलम् ॥ २ ॥
अन्यम्लं मधुरं कषायगुणभृद्विद्वद्भिरुक्तं रसे
वीर्ये संशमनं समीरणहरं पित्तापहं दीपनम् ।
किंचित्संग्रहणं कफस्य हरणं प्रायोऽपि पाके पुनः
प्रख्यातं रसवीर्यपाकविभवैरेवंगुणं दाडिमम् ॥ ३ ॥
दाडिमं द्विविधमीडितमार्यैरम्लमेकमपरं मधुरं च ।
तत्र वातकफहारि किलाम्लं तापहारि मधुरं लघु पथ्यम् ॥ ४ ॥
दाडिमं मधुरमम्लकषायं
कासवातकफपित्तविनाशि ।
ग्राहि दीपनकरं च लघूष्णं
शीतलं भ्रमहर रुचिदायि ॥ ५ ॥

इति दाडिमम् ॥

अथ द्राक्षागुणाः ॥

चक्षुष्या रक्तपित्तं शमयति मधुरा शीतवीर्या विपाके
स्वादुः स्निग्धा कषाया गुरुरति च तृषाशोषदोषापहन्त्री ।
द्राक्षा क्षीणरु (क्ष) तानामपहरति वमीश्वासकासज्वरार्ती-
स्तिक्ताम्यत्वं मदं च प्रवरतरफलेषूत्तमा संप्रदिष्टा ॥ ६ ॥

सुपक्वा ॥

द्राक्षा सैव नु धातुवृद्धिजननी संतर्पणी दोषहत्
तृष्णार्तिच्यवनी समीरशमनी छर्द्यामयध्वंसिनी ।
पाकेऽम्ला सुरसा रसे च मधुरा (शीता) शान्ता च वीर्येण सा
सा पक्वा विहिता ज्वरे च कफजे विण्मूत्रसंशोधनी ॥ ७ ॥

शीता पित्तास्त (स्र) दोषं शमयति मधुरा स्वादुपाकादि (ति) रुच्या
चक्षुष्या श्वासकासश्रमवमित्र (श) मनी शोषतृष्णाज्वरघ्नी ॥
दाहाध्मानश्रमादीनपनयति परा तर्पणी पक्वशुष्का
द्राक्षा सुक्षीणवीर्यानपि मदनकरा कोला (कलाकेलि) दक्षान् विधत्ते
इति द्राक्षा ॥ ॥ ८ ॥

अथ मातुलिङ्गगुणाः ।

चक्र (त्वक्) तिक्ता कटुका कफक्रिमिहरा स्निग्धाऽनिलध्वंसिनी
मांसं बृंहणवातपित्तशमनं वृष्यं महादुर्जरम् ।
अम्लं केसरमग्निवृद्धिजननं सश्वासकासापहं
हिध्माछर्दितृषाम्यजाड्यहरणं तन्मातुलिङ्गोद्भवम् ॥ ९ ॥
तिक्ता स्निग्धा भवति कटुका मातुलिंगस्य सा त्वक्
मध्यं स्निग्धं च (हरति) मधुरं बृंहणं वातपित्ते ।
मांसं भिन्नं (स्निग्धं) भवति लघु तत्केसरं कासहिध्मा-
श्वासश्लेष्मानिल जठरजिद् गुल्मशूल्मा (ला) निलघ्नम् ॥ १० ॥
सिन्धू (त्थे) च्छेन घनागमे (च) वसितया काले शरत्संज्ञके
हेमन्ते लवणार्द्रहिङ्गुमरिचैः सिद्धार्थचूर्णान्वितम् ।
एतैस्तैः शिशिरे मधावपि युतं ग्रीष्मे गुडेनान्वितं
वैद्यैर्भूमिप सालु (मातु) लिंगमुदितं सर्वर्तुसाधारणम् ॥ ११ ॥

अथ जम्बीरम् ॥

जम्बीरमम्लं रसतो विपाके
वातापहं पित्तकफप्रदं च ।
अन्नस्य पार्वन्व (कं त्व) चिरेण कुर्यात्
सुरोचनं वह्निविवर्धनं च ॥ १२ ॥

कटुकमधुरमम्लं सुप्रतीतं रसेषु
रुचिकरमुदराग्नेर्दीपनं वातहारि ।
निहत (हरति) कफपमीरौ पित्तमाहन्ति वीर्य-
करणफलमितीदं वातपित्तं विपक्वम् ॥ १३ ॥
(करणमपि न हृद्यं रक्तपित्तं तनोति ।)
निम्बूफलं रोचकमग्निवृद्धिं
करोति पित्तं च सवातरक्तम् ।
अचाक्षुषं श्लेष्मकरं विशेषात्
भुक्तान्नपाकं कुरुते च सद्यः ॥ १४ ॥
निम्बुकं क्रिमिसमूहनाशनं
तीक्ष्णमम्लमुदरापहं स्मृतम् ।
वातपित्तकफशूलताहितं
नष्टधान्यरुचिरोचकप्रदम् ॥ १५ ॥

अथ नारङ्गफलम् ॥

नारङ्गस्य फलं बलं च कुरुते सुस्वादु हृद्यं लघु
श्रेष्ठं वह्निकरं विदाहशमनं भुक्तान्नपक्तिप्रदम् ।
सर्वारोचकनाशनं श्रमहरं वातापहं पुष्टिदं
भुक्त्वापि प्रतिभक्षितं न कुरुते किंचिद्विकारं नृणाम् ॥ १६ ॥
ईषद्रसे मधुरशीतलमम्लतिक्तं
वीर्योद्गमाच्छमनदीपनपाचनं च
आवेदयति (?) कफपित्तहरं विपाके
नारङ्गकं फलमुदारधियो मुनीन्द्राः ॥ १७ ॥

अथ मधुकर्कटी ॥

सुस्वादु पाके रसतश्चरक्त-
पित्तप्रकोपं विलयंति मांद्ये (?) ।
दाहज्वरं नाशयतीति नित्यं
प्राहुश्च वैद्या मधुकर्कटी च ॥ १८ ॥

अथ मोचाफलम् ॥

मोचं स्वादुरसं विपाकमधुरं वीर्येण शीतं जडं
पित्तघ्नं त्वनिलापहं गुरुतरं पथ्यं न मन्देऽनले ।
सद्यो भुक्तविवर्धनं क्रमहरं तृष्णापहं शान्तिदं
दीप्ताग्नेः सुखदं कफामयहरं संतर्पणं प्राणिनाम् ॥ १९ ॥

अथ नालिकेरीफलम् ॥

स्निग्धं स्वादुरसं विपाकमधुरं हृद्यं जरं(डं) दुर्जरं
पित्तघ्नं क्रिमिवर्धनं मदकरं वातामयध्वंसनम् ।
आमश्लेष्मविकोपनं प्रशमनं वह्नेर्भ्रमध्वंसनं
कन्दर्पस्य बलं ददाति नितरां तन्नालिकेरीफलम्

नालिकेरोदकम् ॥

सुस्वादुवृष्यलघुदीपनरूक्षशीतं
तद्वातपित्तहरवस्तिविशुद्धिहेतुः ।
स्यान्नारिकेलसलिलं शशिकान्ति पथ्यं
पित्तज्वरस्य विषहारि वदन्ति वैद्याः ॥ २० ॥

अथ भव्यफलम् ॥

भव्यं भव्यतरं स्वादु किञ्चिदम्लं सुरोचनम् ।
वातघ्नं मुखवैरस्यनाशनं वह्निदीपनम् ॥ २१ ॥

अथ आमलकीफलम् ॥

करमर (?) हन्ति (वातं तदम्लत्वात्) वातदम्लं चात्पित्तं माधुर्यशैत्यतः।
कफं रुक्षकषायं (यत्वात् फलं धात्र्यास्त्रिदोषजित्) ॥ २२ ॥
....तथा
किंचित्स्वादुरसं विपाकमधुरं दोषत्रयध्वंसनम् ।
मूत्रव्याधिहरं प्रमेहशमनं विष्टम्भविच्छेदनम्
भुक्ताभुक्तहितं सदामृतरसं पथ्यं च धात्रीफलम् ॥ २३ ॥
रूक्षं स्वादु कषायमम्लकटुकं स्निग्धं सुसे (?. रोचनं
चक्षुष्यं बलवर्णदं धृतिकरं वृष्यं च बुद्धिप्रदम् ।
कण्डूकुष्ठविनाशनं ज्वरहरं तृड्दाहतापापहं
जातं किंबहुना ! त्रिदोषशमनं धात्रीफलं प्राणिनाम् ॥ २४ ॥
त्रिधाफले (धात्रीफलं) दिनं (तद्विनि) हन्ति मेहा-
नरोचकादीन् विविधान् विकारान् ।
अम्लं च (म्लत्व) माधुर्यकषायतः क्रमात्
दोषत्रयघ्नं लघु शीतवीर्यम् ॥ २५ ॥

प्राचीनामलकफलम् ॥

पानी य ? मलकं (प्राचीनामलकं) वृष्यं स्वादु हृद्यं कफापहम् ।
शीतलं वृष (ष्य) मायुष्यं दाहज्वरहरं परम् ॥ २६ ॥

अथ आम्रफलम् ॥

बालं पित्तकफास्रवातजननं बधा (द्वा)स्थि तादृग्विधं
पक्वं स्वादुरसं त्रिदोषशमनं क्षीणाङ्गपुष्टिप्रदम् ।
धातोर्वृद्धिकरं विपाकमधुरं संतर्पणं कान्तिदं
तृष्णाशोषनिवारणं रुचिकरं आम्रं (म्रं) फलेषूत्तमम् ॥ २७ ॥
सन्तर्पणीयः सकलेन्द्रियाणां
बलप्रदो वृष्यतमश्च हृद्यः ।
स्त्रीषु प्रहर्षं विपुलं ददाति
फलाधिराजः सहकार एव ॥ २८ ॥
आम्रं पाकस्य काले मधुरमिह रसेनेषदम्लं च हृद्यं
रेतोवृद्धिं विधत्ते शमयति पवनं पाचनं दीपनं च ।
आनन्दं संदधाति प्रतिदिशति बलं वीर्यतः सुश्रुताद्याः
विख्याताः सर्वलोके ह्यतिजनितकफं दुर्जरं कीर्तयन्ति ॥ २९ ॥
यत्कामिन्यधरोवृषं (ष्ठसं) भृतमिति ख्यातं विशिष्टैर्बुधैः
यद् दैत्यप्रमुखैः प्रयत्ननिरतैः कृष्टं सुरैः सागरात् ।
यन्नानारुचिभिः स्वभावसदृशं ख्यातं च मिथ्यैव तत्
पीयूषं विधिनाऽत्र संशयहरं सृष्टं रसालात्मकम् ॥ ३० ॥

अथ कपित्थफलम् ॥

आमं कण्ठहरं कपित्थमधिकं जिह्वाजडत्वप्रदं
तद्दोषत्रयकोपनं विषहरं संग्राहकं रोचकम् ।
पक्वं श्वासवमिक्कमश्रमतृषाहिध्मापनोदक्षमं
सर्वं ग्राहि विषापहं च कथितं सेव्यं ततः सर्वदा ॥ ३१ ॥

फणास (भा०) ॥

दुर्जरो मधुराम्लश्च वातपित्तप्रणाशनः ।
वातपित्तहरश्चैव गुरुर्मन्दाग्निकारकः ॥ ३२ ॥
मधुरा बृंहणी वृष्या पित्तला त्वक् त्रुटिप्रदा ।
पित्तघ्नी स्वादुहृद्या च मज्जेत्याहुर्गुणोत्तमाः ॥ ३३ ॥
कषायमधुरो रूक्षः कटुकः श्लेष्मकारकः ।
संग्राहिदुर्जरो जिह्वाग्राह्यकारी जडो गुरुः ॥ ३४ ॥ टेंबरु (भा०) ॥

अथ करमर्दगुणाः ॥

करमर्दोऽतिमधुरः सुपक्वोऽम्लरसस्तथा ।
वातपित्तप्रशमनः श्लेष्मक्रिमिविनाशनः ॥ ६५ ॥ करवेंद (भा०) ॥

अथ चिञ्चागुणाः ॥

अम्लिकायाः फलं पक्वं रक्तपित्तकरं परम् ।
त्वग्भस्म स्यात्कषायोष्णं कफजन्त्वनिलापहम् ॥ ३६ ॥ चिंचा ॥

अथ भल्लातकगुणाः ॥

भल्लातकस्य त्वग्मांसं बृंहणं स्वादु शीतलम् ।
तदस्थ्यग्निसमं मेध्यं कफवातहरं परम् ॥ ३७ ॥

बिंबदाम् (भा०) ॥

अथ खर्जूरम् ॥

खर्जूरो रक्तपित्तं शमयति मधुरः स्वादुपाकोऽतिशीतः
तृष्णाशोषापहर्ता विषममदरुजाश्वासहिध्मापनोदी ।
स्निग्धो वृष्यो बलासं जनयति नितरां वह्निमान्द्यं विधत्ते
कान्तिं वै पुष्टियुक्तचा वपुषि समधिकं, मूत्रकृच्छ्रं निहन्ति ॥ ३८ ॥
पिण्डखर्जूरमध्यं च तादृगेव निगद्यते ।
विशेषाद्ऊर्ध्वगे रक्ते दाहे पित्ते च शस्यते ॥ ३९ ॥

अथ सिंदीफलम् ॥

सिन्दोलं कफवातपित्तशमनं रक्तातिसारापहं
यामाकुष्ट (पामाकुष्ट) भगन्दरामशमनं तीव्राश्मरीछेदनम् ।
हृद्रोगेषु हितं सदा बलकरं कामाग्निसंदीपनं
कासे क्षीणविरेचने ज्वरगते (दे) शस्तं च सिन्दीफलम् ॥ ४० ॥

अथ सुवर्णकदलीफलम् ॥

सुवर्णमोचा कफपित्त [कात] हारिणी
विष्टम्भिनी दीपनकारिणी च ।
स्तदुर्जरं [सुदुर्जरा] दाहविघातनं [तिनी] च
रक्तं सपित्तं प्रशमं च [शमयेत] निश्चितम् ॥ ४१ ॥

उतती (भा०) ॥

ईषत्कषाया मधुरा वातपित्तनिबर्हणी ।
बल्या वृष्या च हृद्या च विशेषादुतती गुरुः ॥ ४२ ॥

अथ पिप्पलफलं ॥

अश्वत्थवृक्षस्य फलानि पथ्या-
न्यतीव हृद्यानि सुशीतलानि ।
निघ्नन्ति पित्तं सह शोणितेन
दाहं तृषां छर्दिमरोचकं च ॥ ४३ ॥
[कुर्वन्ति पित्तास्रविषार्तिदाहतृट्छर्दिशोषारुचिदोषनाशं]

उदुंबरफलम् ॥

औदुम्बरं फलमतीव सुशीतलं च
सद्यो निवारयति शोणितपित्तमुग्रम् ॥ ४४ ॥

अथ उम्बीफलम् ॥

मूत्रावरोधं कुरुतेऽतितीव्रं
विशेषतो रक्तसमीरणं च ॥

अथ राजकोशातकीफलम् ॥

सुराजकोशातकि पित्तघाति
महागदे शोषमदात्यये च ।
श्रमक्लमे मेहभगन्दरे च
व्रणेषु पित्तेष्वपि नित्यपथ्यम् ॥ ४५ ॥

अथ सिराकोशातकीफलम् ॥

सिराकोशातकी पित्तहरी क्षुत्तृड्विनाशनी ।
मेहे हिता सदोष्णापि पित्तच्छर्दिविनाशनी ॥ ४६ ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते फलवर्गः ॥

अथ शाकवर्गः ॥

फलं पर्य्यागतं शाकमाशुष्कं तरुणं नवम् ।
पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ॥ १ ॥
शाकं षड्विधमुद्दिष्टं सर्वं विद्याद्यथोत्तरम् ।
सर्वशाकमजाद्येयमवाकजूपम पैरुषम् [?] ॥ २ ॥
अन्यत्रैव सुमध्यस्थकालशाकपुनर्नवा [?] ॥

अथ तण्डुलीयकगुणाः ॥

शीतो रूक्षो लघुरतितरां पित्तरक्तापहन्ता
स्वादुः पाके भवति च रसे स्वादुरेवातिहृद्यः ।
हन्ति व्याधीन् विषमविषजान् श्लेष्मवातप्रकोपं
सद्यो मज्जामयविघटनस्तण्डुलीयोऽतिपथ्यः ॥ ३ ॥
रसे विपाके मधुरोऽतिशीतो
रूक्षस्तुषारः कफनाशनश्च ।
सदाहपित्तं रुधिरं विषं च
विशेषतो हन्ति च तण्डुलीयः ॥

अथ वास्तुकचिल्लीशाकं ॥

वास्तूकोऽग्निकरो रसे च मधुरः पित्तापहश्चाक्षुपः
स्निग्धो वातविनाशनः क्रमिहरः कुष्ठादिदोषापहः ।
[व] चर्चोमूत्रविशोधनः प्रमथनः श्लेष्मामयानां तथा
शाकानामपि यो [चो] त्तमो लघुतरः पथ्यः सदा प्राणिनाम् ॥ ५ ॥

वास्तुकेषु च सर्वेषु शस्यते कठवास्तुकः ।
चिल्लिर्वास्तुकवज्ज्ञेया ततो न्यूना च किंचन ॥ ६ ॥
सक्षारः क्रिमिजित्त्रिदोषशमनः संदीपनः पाचनः
चाक्षुष्यो मधुरः सरो रुचिकरो विष्टम्भिशूलापहः ।
वर्चोमूत्रविशोधनः स्वरकरः स्निग्धो विपाके कटुः
वास्तूकः, सकलामयप्रशमनी चिल्ली तथैवोत्तमा ॥ ७ ॥

चिल्लिताकवला (भा०) ॥

अथ शिग्रशाकं ॥

कफस्य वातस्य शमं करोति
उष्णं च पित्तं कुरुतेऽग्निदीप्तिम् ।
हृद्यं क्रिमिघ्नं च सुरोचकं च
आध्मानविबन्धविनाशनं च ॥ ८ ॥ [शिग्रुशाकं]

अथ राजिका ॥

राजिका कफमरीरणहन्त्री
रोचनाग्निजननी च विहृद्या ।
कंव हृद्यमिव [कण्ठरुक्क्रिमिवि] नाशनकर्त्री
उष्णवीर्यमुपहन्ति च शूलम् ॥ ९ ॥

मद्गरीया [भा०] ॥

अथ शतपुष्पा ॥

शतपुष्पामवातघ्नी शूलगुल्मोदरापहा ।
दीपनी च विशेषेण किंचित्पित्तप्रकोपिनी ॥ १० ॥

अथ कुस्तुम्बरी ॥

सुगन्धिर्वातपित्तघ्नी लघ्वी रुच्या ज्वरे हिता ।
व्यञ्जनालङ्कृतिः शीता साऽऽर्द्रा कुस्तुम्बरी स्मृता ॥ ११ ॥

अथ राजवल्ली ॥

बल्या वृष्या च कण्ठ्या कफपवनहरा स्यात् त्रिदोषे प्रशस्ता
लघ्वी मूत्रातिघातप्रशमनवमनी स्यात्तथा कृच्छ्रहन्त्री ।
पित्तोद्रेके च रक्ते विषमविषहरी दीपनी शाकश्रेष्ठा [वर्या]
पत्राणां राजवल्ली फलमरुलसलानाप्रवृद्धिं [?] करोति ॥ १२ ॥

अथ कुसुम्भी ॥

दृष्टिप्रसादं कुरुते विशेषाद्
रुचिप्रदं दीप्तिकरं च वह्नेः ।
विण्मूत्रदोषापहरं मलघ्नं
कौसुम्भशाकं प्रवरं वदन्ति ॥ ॥ १३ ॥

अथ सार्षपम् ॥

अत्युष्णवीर्यं कुरुतेऽग्निदीप्तिं
रक्तं सपित्तं त्वथ कण्ठरोगम् ।
अचाक्षुषं शुक्रकरं विदाहि
न सार्षपं शाकमिदं हि पथ्यम् ॥ १४ ॥

अथ वार्ताकम् ॥

॥ सदाशिवम् (?) ॥

सक्षारं कफपित्त (वात) हारि मलकृद्वह्नेस्तु संदीपनं
तिक्तोष्णं मधुरं तथा कटुरसं त्वीषच्च पित्तप्रदम् ।
हृद्यं वातविकिं न मद्यपथ्यमपि तत् द्रव्ये व सर्वे पुनः (?)
(हृद्यं रुच्यमपित्तलं कफमरुज्जित्सर्वशाकोत्तमं)
वार्ताकं परिपूर्णजातसरसं बालं न पक्वं हितम् ॥ १५ ॥
वार्ताकं कफवातघ्नं किंचित्पित्तप्रकोपनम् ।
सरसं मूत्रलं प्रोक्तं बलकृद्बालमेव तत् ॥ १६ ॥
लवणमरिचचूर्णेनाढ्यं रामठाढ्यं
दहनवदनपक्वं जम्बुकान्तं नितान्तम् ।
हरति पवनमाद्यं श्लेष्महन्तृ प्रसिद्धं
जठरभरणयोज्यं चारु भोज्यं भरीतम् ॥ १७ ॥ वृन्ताक भरितं

अथ बिम्बीफलम् ॥

बिम्बीफलं स्वादु शीतं स्तम्भनं लेप (ख) नं गुरु ।
पित्तास्रदाहशोफघ्नं वाताध्मानविबन्धकृत् ॥ १८ ॥ बिम्बीफलम् ॥

अथ कर्कोटीफलम् ॥

तिक्तं सुतीव्रं मधुरं तथाम्लं
वातापहं पित्तविनाशनं च ।
श्लेष्माकरं चेतनपातनं (दीपनपाचनं) च
कोटीभवं चाग्निकरं नराणाम् ॥ १९ ॥

कर्कोटिकाफलं गुल्मशूलपित्तकफापहम् ।
त्रिदोषमेहकुष्ठघ्नमीषन्मधुरतिक्तकम् ॥ २० ॥
कासश्वासज्वरं हन्ति मारुतघ्नं परं लघु ॥ कंकोडा भा० ॥

अथ मूलकगुणाः ॥

किंचित्क्षारं सतिक्तं कटुकरसयुतं मूत्रलं दोषहारि
श्रेष्ठं गुल्मक्षये च प्रबलतरमहाश्वासकासामयेषु ।
कण्ठ्यं श्रेष्ठं स्वराणामपहरति रुजं नेत्ररोगापहारि
स्यादेवं बालमूलं महदपि च हितं स्निग्धपाकं (पक्वं) समीरे ॥ २१ ॥
॥ मूला भा० ॥

अथ सूरणः ॥

रुच्यो दीपनपाचनः क्रिमिहरो मन्दानलोद्दीपनो
हृद्यः श्लेष्मकरो लघुर्बलकरो दुर्नामनिर्नाशनः ।
अक्षाणामपि पाटवं प्रकुरुते सश्वासकासापह-
श्चाक्षुष्योऽपि च (सु) स्मरणः स्मृतिकरो हृत्पार्श्वशूलापहः ॥ सूरणः ॥

अथ भूकन्दः पिण्डालुश्च ॥

भूकन्दस्त्वतिवातलो बलकरः श्लेष्माणमत्यर्थकृत्
विष्टम्भी गुरुमेदसोपि विषमो वातामयान् कारकः ।
मेहं कुष्ठरुजं करोति सततं तद्वातरक्तं हरेत्
पिण्डालुः कृमिकोष्ठकृच्छ्रमपहृत् पित्तामयध्वंसकः (योत्तेजनः)
॥ पिंडालुः ॥

अथार्द्रकं ॥

आर्द्रं दीपनपाचनं रुचिकरं वृष्यं कदुष्णं वरं
सर्वं मेदकरं कफामयहरं शोफापहं शूलजित् ।
जिह्वाकण्ठविशोधनं सलवणं पथ्यं सदा भोजने
निम्बूतोयविमर्दितं कफहरं संदीपनं सारणम् ॥ २४ ॥
निम्बुसामुद्रसंयुक्तमार्द्रकं त्वस्रपित्तनुत् ।
दीयनीयं रुचिकरं हृद्यं दोषत्रयापहम् ॥ २५ ॥ ॥ आर्द्रकम् ॥

अथ कुमुदोत्पलपद्मकन्दगुणाः ॥

कुमुदोत्पलपद्मानां कन्दा मारुतकोपनाः ।
कषायाः पित्तशमनाः विपाके मधुरा हिमाः ॥ २६ ॥
हृद्याः कफहराः कन्दाः कटुकाः पित्तकोपनाः ।
मेहकुष्ठकृमिहरा वृष्या बल्या रसायनाः ॥ २७ ॥
कुमुदोत्पलपद्मानां कन्दा गुणकरा हिमाः ।
मधुराश्च कषायाश्च पित्तासृग्दाहनेरिताः (नाशनाः) ॥ पद्मकन्दः ॥

अथ मृणालगुणाः ॥

शीतलं रक्तपित्तघ्नं दाहज्वरहरं परम् ।
मृणालनालं वृष्यं च तृष्णाछर्दिविनाशनम् ॥ २९ ॥ कमलनालः ॥

अथ शृङ्गाटकगुणाः ॥

शृङ्गाटकः शोणितपित्तहारी
लघुः सरो बृष्यतमो विशेषात् ।
नृ (त्रि) दो (ष) तापत्रयशोषहन्ता
रुचिप्रदो मेहनदाहहेतुः ॥ ३० ॥

अथ वारिकशेरुकगुणाः ॥

हन्त्यस्रपित्तमरुचिं वमिमोहदाहं
तृष्णामदक्लमहरं मधुरं च शीतम् ।
कण्ठास्यशोषशमनं गुरु रक्तपित्ते
क्षीणे च पथ्यमति वारिकशेरि (रु) कं स्यात् ॥ ३१ ॥

अथ वर्जनीयकन्दकीर्तनं ॥

बालं ह्यनार्तवं जीर्णं विद्धं तु कृमिभक्षितम् ।
कन्दं च वर्जयेत्सर्वं यो वा सम्यङ्न रोहति ॥ ३२ ॥

अथ कलिङ्गगुणाः ॥

सर्वदोषहरं हृद्यं पथ्यं रेतोविकारिणाम् ।
दृष्टिशुक्रक्षयकरं कलिङ्गं कफवातजित् ॥ ३३ ॥ ॥ कलिङ्गं ॥

अथ कूष्माण्डगुणाः ॥

बृष्यं वर्णकरं बलोपजननं पित्तापहं वातजित्
मूत्राघातहरं प्रमेहशमनं कृच्छ्राश्मरीछेदनम् ।

विण्मूत्रग्लपनं (?) तृषाऽऽर्तिशमनं क्षीणाङ्गपुष्टिप्रदं
कूष्माण्डं प्रवरं वदन्ति भिषजो वल्लीफलानां पुनः ॥ ३४ ॥
मूत्रावरोधशमनो बहुमूत्रकारी
कृच्छ्राश्मरीप्रशमनो विनिहन्ति पित्तम् ।
पथ्यः संशोणितसमूबल (सशोणितसमुल्बण) पित्तरोगे
तृष्णाऽपहं त्रिषु शमन (समं त) मुदाहरन्ति ॥ ३५ ॥

अथोर्वारुकगुणाः ॥

ए (उ.) र्वारुकं पित्तहरं शुशीतं
मूत्रामयघ्नं रुचिकारकं च ।
सुस्वादु दाहोपशमं प्रशस्तं
पित्ते च रोगे कफरोगवर्ज्यम् ॥ ३६ ॥
वालुकानि च सर्वाणि दुर्जराणि गूजणि (गुरूणि) च ।
मन्दाग्निं च प्रकुर्वन्ति रक्तपित्तकराणि च ॥ ३७ ॥ वालुक भा० ॥

अथ सिन्धणी ॥

सिन्धणी वातशमनी वृष्या मधुरशीतला ।
रक्तपित्ते च दाहे च पित्तार्तीनां प्रशस्यते ॥ ३८ ॥ सेंधणी भा० ॥

अथ चिल्लीकाकमाचीप्रभृतीनां गुणाः ॥

चिल्ली (ल्ली) वास्तुकवद् ह्रघ्ना (घ्या) संग्राही गुरुवातला ।
काकमाची त्रिदोषघ्नी चाङ्गेरी कफवातहृत् ॥ ३९ ॥

वातहृद् दीपनी पंजी भारंगी नालिचाष्टकौ (?) ।
मधुरौ कफपित्तघ्नौ कौसुम्भं सर्वरोगहृत् ॥ ४० ॥
मूलकं दोषकृच्चामं पक्वं वातकफापहम् ।
गाजिका पित्तला वातकफघ्नस्तण्डुलीयकः ॥ ४१ ॥
चर्पाभूर्वातपित्तघ्नी सिद्धार्थः कफवातहृत् ।
कृमिपित्तकफध्वंसी दीपनः कासमर्दकः ॥ ४२ ॥
कर्कोटकं सवार्ताकं पटोलं कारवेल्लकम् ।
अष्ट (कुष्ठ) मेहज्वरश्वासकासमेदःकफापहम् ॥ ४३ ॥
सर्वदोषहरं ज्ञेयं कूष्माण्डं बस्तिशोधनम् ।
राजकोशातकीतुम्बीफलमत्युग्रपित्तहृत् ॥ ४४ ॥
त्रपुसं वातलं वातश्लेष्मलं पित्तनाशनम् ।
कालिङ्गं तुच्छकं वातपित्तहृच्च कशेरुकम् ॥ ४५ ॥

अथ शाकसंस्कारकद्रव्यनिरूपणम् ॥

शुंबी (शुण्ठी) मरीचपिप्पल्यः कफवातहरा मताः ।
गुल्मशूलविबन्धघ्नो हिङ्गुर्वातकफापहः ॥ ४६ ॥
पचानी (यवानी) धान्यकं जीवं (बीजं) वातपित्तकफापहम् ।
सौवर्चलं (लं) विबन्धघ्नं सैन्धवं च त्रिदोषहृत् ॥ ४७ ॥
एतैस्तु संस्कृतं पक्वं भृष्टं व्यञ्जनसौरभम् ।
पेयाऽऽदिकं च कम्पादीन् सर्वदोषान् व्यपोहति ॥ ४८ ॥

॥ इत्यायुर्वेदमहोदधौ सुपेणकृते फलशाकवर्गः ॥

॥ अथेदानीं शिखरिणी कथ्यते ॥

अर्धाढकं सुचिरपर्युषितस्य दध्नः
खण्डस्य षोडश पलानि शशिप्रभस्य ।
सर्पिः पलं मधु पलं मरिचं द्विकर्षं
शुण्ठ्याः पलार्धमपि चार्धपलं चतुर्णाम् (=चतुर्जातकस्य) ॥
श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा
कर्पूरचूर्णसुरभीकृतचारुसंस्था ।
एषा वृकोदरकृता मु (सु) रसा रसाला
चास्वादिता भगवता मधुसूदनेन ॥ २ ॥
त्रिंशत्पलानि दध्नश्च त्वगेलाऽर्धपलं तथा ।
मध्वाज्यस्य पलार्धं च (र्धार्धं) मरीचानां (चैला) पलार्धकम् ॥ ३ ॥
पलान्यष्टौ च खण्डस्य पटे शुद्धेऽवधार (गाल) येत ।
कर्पूरवासिते भाण्डे छायायां स्थापयेदिदम् ॥ ४ ॥
एषा शिखरिणीत्युक्ता प्रदीप्ता बलवर्धनी ।
आयुःप्रवर्धनी चैव सर्वरोगप्रमर्दनी ॥ ५ ॥
(नाश) सान श्येत्तृड्रुजास्थौल्यं नराणां सर्वदा हिता ।

॥ द्वितीया शिखरिणी ॥

कपित्थमातुलुङ्गैलासारिवार्धक (?) बीजकैः ।
शर्कराशुण्ठिसामुद्रमुद्गचूर्णैः सुसंयुतैः ॥
सदा पथ्या नियुञ्जयाच्च (द्धाध्व) क्षीणे देहे च पुष्टिदा ॥ ७ ॥

सुजातं दधि भेदं च (निक्षिप्तं) वस्त्रे बद्ध्वा सुपीडितम् ।
नानापुष्पफलारम्भं कुर्याद् दधि मनोहरम् ॥ ८ ॥
सक्तं दधिरसं श्रेष्ठं तद्धृतं शोधिते पटे ।
लवणेन समं युक्त्या शिखरिण्यमृतोपमा ॥ ९ ॥
रसाला सर्वदोषघ्नी रक्तपित्तनिबर्हणी ।

॥ अन्या शिखरिणी ॥

सन्मातुलिङ्गस्य दलं त्वगेलां
सरंगपिप्पल्यी ससमं (?) सितया समेतम् ॥
व्योषाच्च गद्याणयुगप्रयुक्तं
स्याद्वार्तकं (?) दृष्टिसमं सितवस्त्रबद्धम् ॥ १० ॥
कर्पूरवासाच्च तथैव पश्चा-
द्युक्त्या च संमर्द्य कृता रसाला ।
एषा कृता शिखरिणी सुरसा रसाला
सुषेणदेवेन रथाश्वहेतोः ॥ ११ ॥
आस्वादिता शिखरिणी परमेश्वरेण
दोषांश्च सर्वान् विनिहन्ति वोग्रान् ।
पित्तास्रकृच्छा (सृगुत्था) नपि हन्ति सर्वान्
भोज्यानि सर्वाण्यपि जारयन्ति ॥ १२ ॥

॥ अमृतप्राशशिखरिणी ॥

नारङ्गं दाडिमं स्यात्पलमधुकयुतं मातुलुङ्गस्य तोयं
द्राक्षातोयं समांशं गुडदधिसहितं शर्कराऽजाजिमिश्रम् ।

(श्रेष्ठा पानेषु वृष्या सित) श्रेष्ठो पादे च वृष्यात्सम रिचयुता
सैन्धवैर्वापितं त-
न्निष्पीड्यं सर्वमेतत् कुरु (रचय) शिखरिणां राजयोग्या
यतस्ताः ॥ १३ ॥

अन्यच्च ।

मातुलुङ्गसिताऽजाजीमरीचार्द्रकनागरैः ।
कर्पूरसहितैर्युक्त्या दधिपर्युषिताः समाः ॥ १४ ॥
रसं योगेषु सर्वेषु बदरस्य समस्य च ।
नागरं रससंमिश्रं रसालैषाऽमृतोपमा ॥ १५ ॥
अच्छे पटे च संघृष्टा रक्तपित्तनिबर्हिणी ॥

॥ चन्द्रामृतस्राविणी नाम शिखरिणी ॥

मातुलिङ्गकपित्थाम्लतिन्तिडीकाम्लदाडिमैः ।
शर्करासहितैर्युक्तं दधिपिष्टं शुचौ पटे ॥ १६ ॥
योजितं मरिचाजाजीचातुर्जातकभूस्तृणैः ।
भुक्ता चार्द्रकसंयुक्ता रसालाऽमृतसंभवा ॥ १७ ॥
सर्वरोगप्रशमनी दाहपित्तनिबर्हणी ।
रक्तोद्रेकहरी पथ्या सर्ववातानुलोमनी ॥ १८ ॥
एषा शिखरिणी प्रोक्ता सुषेणेन विनिर्मिता ।

॥ अन्यच्च ॥

अग्र्या दधिगुडाजाजीनागरार्द्रकयोजिता ॥ १९ ॥

सुचतुर्जातघृष्टा च रसालैषाऽमृतोपमा ।
सर्वकृच्छ्रप्रशमनी सर्वातीसारनाशनी ॥ २० ॥
पित्तोद्रेकहरी पथ्या पित्तातीसारनाशनी ।
सुषेणदेवेन कृता रसाला ह्यमृतोपमा ॥ २१ ॥

॥ इति सुषेणकृते शिखरिणीवर्गः ॥

अथ व्यञ्जनवर्गः ॥

हिङ्गूषणाजाजिमहौषधानि
चूर्णीकृतानि त्रिगुणं क्रमाच्च ।
सदीप्यकं सूरणपूष (?) मांस-
रसप्रयोगेषु च नित्यमिष्टम् ॥ १ ॥
यवानिजीरके तुल्ये तयोर्द्विगुणसूरणम् ।
ईषत्पुष (?) समायुक्तं ततो व्यञ्जनसौरभम् ॥ २ ॥
सर्वरोगहरं पथ्यं वातदुर्नामनाशनम् ।
शुण्ठीमरीचपिप्पल्यः समं नागविचूर्णिताः ॥ ३ ॥
चव्यचित्रककापित्थसारयुक्तं सुसंस्कृतम् ।
सैन्धवेन समोपेतं तक्रपीतं च यत्र चित् ॥ ४ ॥
एतद्धि व्यञ्जनं श्रेष्ठं सर्ववातनिवारणम् ।
महागुल्मप्रशमनं सुषेणेन कृतं नृणाम् ॥ ५ ॥
सर्ववातामये शस्तं नृणां भेषजमुत्तमम् ।

॥ अन्यच्च ॥

मरीचं दीप्यकं शुण्ठी चव्यं चित्रकमेव च ॥ ६ ॥

पिप्पलीपिप्पलीमूलधान्याकाजाजिसैन्धवम् ।
जीरकं दाडिमं पथ्या चामलं हृद्यगन्धकम् ॥ ७ ॥
एतत्कल्पसमं मिश्रं पक्त्वा तक्रे सपिण्डके ।
वातश्लेष्महरा हृद्या परमा रुचिवर्धिनी ॥ ८ ॥
आमातीसारशूलघ्नी वातगुल्मनिकृन्तनी ।
कासश्वासहरा चोग्रा मन्दा मेदायिनी (?) परा ।
उक्ता चैव सदा पथ्या सोत्तमा कठिना स्मृता ॥ १० ॥

क्वथिका (भा०) ॥

मरिचजरणशुण्ठीपिप्पलीमूलचव्यं
दहनरुचकधान्यं पिप्पली सैन्धवं च ।
अत्रपकपित्थसारं दाडिमिकाजि (?) हिंगु-
र्युवतिकरसुपक्वं आमलक्यं सुतक्रम् ॥ ११ ॥
हरति पवनमाद्यं श्लेष्मदाहं सकृच्छ्रं
अरुचिजठरशूलं चामवातातिसारम् ।
विदितसकलवेद्यो वैद्यराजः सुषेणोः
विरचयति कपित्थव्यञ्जनं राजगोप्यम् ॥ १२ ॥

॥ अन्यच्च ॥

त्रिकटुकमजमोदा सैन्धवं जीरके द्वे
करमथितकपित्थं चित्रकं पिप्पली च ।
समधृतकृतचूर्णं तत्र संयोजितव्यं
क्वथितमिह समानं योजितं रामठेन ॥ १३ ॥

कृतलवणसुधान्यं मातुलुङ्गस्य सारं
कफपवनविकारे सर्वदा व्यञ्जनं स्यात् ।
वातेऽग्निमान्द्येऽपि च शूलमान्द्ये
मूर्छां निगृह्णाति चिरप्रवृद्धाम् ॥
सुषेणदेवेन कृता रसाला
सुसौरभा रोगहराऽपि पथ्या ॥ १४ ॥

॥ इति श्रीसुषेणकृते व्यञ्जनवर्गः ॥

॥ इदानीं मांसगुणाः कथ्यन्ते ॥

मांसं स्वादुमतां वरं सुबलकृत् स्नेहाधिकं देहिनो
नित्यं धातुषु साम्यकृच्च कथितं तद् वर्णकृद् बृंहणम् ॥
भुक्तं तृप्तिकरं च कामकरणं वातादिदोषान् हरेत्
तस्मादाङ्गिकदोषशान्तिकृतये भुञ्जीत मांसं सदा ॥ १ ॥

अथ लावमांसगुणाः ॥

लावा हिमस्वादुकषाययुक्ता
वृष्याग्निकृत् स्निग्धलटी (?) प्रहृद्याः ।
संग्राहिका वै कटुपाचिताश्च
ते संनिपातेषु हिताः समस्ताः ॥ २ ॥ ॥ लावरू (भा०) ॥

अथ कृष्णतित्तिरिगुणाः ॥

ईषद्गुरूष्णो मधुरोऽतिवृष्यो
मेधाग्निसंवर्धनकारकश्च ।
बल्यो विहन्यात्स कफज्वरांश्च
वातामयाद्यान् शितितित्तिरिश्च ॥ ३ ॥ ॥ कृष्णतित्तिर (भा०) ॥

अथ गौरतित्तिरिः ॥

गौरस्तित्तिरिकोऽग्निकृत्कफहरो रूक्षोऽतिपित्तापहः
श्लेष्माणं विनिहन्ति चैष बलवान् रक्तं च पित्तं जयेत् ।

अथ कापिञ्जलः ॥

सोऽसृक्पित्तहरोऽतिशीतललघुर्बल्योऽतिवृष्यः सदा
वाते स्यान्मृदुकुष्ठहृत् कृमिहरो मेहामयध्वंसनः ।
क्षीणे रेतसि मेदसाऽग्निजननः कापिञ्जलः शस्यते
वातासृग्विलयं करोति तरसा पित्तामयध्वंसकः ॥ ४ ॥

अथ वार्तकगुणाः ॥

पाण्डुप्रमेहपिडिकाकृमिसंभवेषु
रोगेषु वातबहुलेषु च शस्यते च ।
वातास्रपित्तकफजान् विनिहन्ति कीलान्
गुल्माग्निमान्द्यमरुचिं लघु वार्तकं च ॥ ५ ॥

अथ ककरोपचक्रिकागुणाः ॥

लघुश्च वृष्या च बलोपबृंहणी
हृद्या तथा ककरोरुचिक्रिया (सककरोपचक्रिका) ॥

अथ मयूरमांसगुणाः ॥

कषायं कटुकातिवृष्यजननं सुस्वादु केप्यं (कण्ठ्यं) तथा
सक्षारं रुचिकारकं विषहरं मन्दानलध्वंसकम् ।
(स्वर्यं) श्वर्ये मेध्यमतीव हृष्टिजननं श्रोत्रेन्द्रिये दार्ढ्यकृत्
स्निग्धोष्णानिलहास्रपित्तशमनं मायूरमांसं सदा ॥ ७ ॥
हेमन्तकाले शिशिरे वसन्ते
सेव्यं हि मायूरमुशन्ति मांसम् ।

अथ कुक्कुटमांसगुणाः ॥

उष्णः स्वादुतरो बलस्वरकरो वृष्यः सदा बृंहणः
पाके स्निग्धतरो महाऽनिलहरो मेदःकफालस्यकृत् ।
आयुष्यं कुरुते क्षयेषु विषमे मेहे वमौ शस्यते
प्रोक्तः कुक्कुटको हि दोषशमनः सर्वामयध्वंसकः ॥ ९ ॥

अथ कपोतादिगुणाः ॥

कपोतपारावतभृङ्गराजा
जटी कुलिङ्गं गृहजं पिकश्च ।
भेदाशिडिंडीशुकसारिवाल्-
काखञ्जरीटा हरिताः प्रशस्ताः ॥ १० ॥
कषाया मारुता रूक्षाः फलाहारा मरुचराः ।
पित्तश्लेष्महराः पित्ता (प्रोक्ता) बद्धमूत्राल्पवर्चसः ॥ ११ ॥

सदा दोषकरस्तेषां मेदाशी मलदूषकः ।
काषाया लवणा हिमाः कफकरा वृष्याः सदा दुर्जरा
विष्टम्भं जनयन्ति मूत्रबहुलं पित्तास्यदाहान् किल ।
आमाध्मानकरास्त्रिदोषजनना मोहास्यवैरस्यकाः
कृच्छ्राग्नेर्बलकारकाः श्रमहराः दौर्गन्ध्यदाः श्लेष्मलाः ॥ १२ ॥
एते प्रावृषि सेविताः प्रतिदिनं दोषव्रजघ्नाः खलु ।
आकाशगामिनः सर्वे बल्या वृष्याः सुदुर्जराः ॥ १३ ॥

कौलिङ्गगुणाः ॥

कौलिङ्गो मधुरोऽतिवृष्यकफकृच्छ्रुक्काश्मरीछेदनः
पित्तास्रातिहरोऽतिशुक्रजननः स्निग्धास्यमाधुर्यकृत् ।
बल्यो मारुतनाशनः कृमिहरो वार्यश्च नेत्रामये
दुर्नामप्रशमी विशेषपवनध्वंसी सदा दुर्जरः ॥ १४ ॥

ग्राम्याणां गुणाः ॥

ग्राम्या वातहराः सर्वे बृंहणाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां दीपना बलवर्धनाः ॥ १५ ॥

कपोतगुणाः ॥

कापोतः स्याद्गुरुरतिहिमः स्निग्धमन्दः प्रकोपी
श्लेष्मा पित्ते प्रणयविजरा जर्जरा चं चदनात् [?] ।
रेतःक्षीणे श्रमहरवरः कृच्छ्रमूत्रे निदाघे
मोहे योज्यः स भवति नृणां कायकारी बलाय ॥ १६ ॥

अथ जाङ्गलमासगुणाः ॥

जाङ्गलं वस्तिदोषघ्नं गुरु पीनसनाशनम् ।
लघुपाकं न शीतं च नातिस्निग्धमदाहि च ॥ १७ ॥

अथाजाविमांसगुणाः ॥

[नातिशीतं गुरु स्निग्धं मांसमाजमदोषलम्]

शरीरधातुसामान्यादनभिष्यन्दि बृंहणम् ।
बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु ॥ १८ ॥

अथैणमांसगुणाः ॥

ऐणं मांसं च हृद्यं बलकरमपि तत्पित्तरक्तं निहन्ति
पाण्डुक्षीणे सदाहे कफपवनरुजो नाशयत्याशु कीलान् ।
प्लीहानाहौ विबन्धं ज्वरहरणपरं मेदसोऽन्तं करोति
रेतःक्षीणेषु योज्यं रुचिकरणलघु श्वासकासं छिनत्ति ॥ १९ ॥
मेदः पुच्छोद्भवं स्यात्कफपवनहरं कान्तिदं पुष्टिदं स्यात्
वातासृक्पित्तकृत्स्यान्मदहरविषहृच्छ्वासकासं छिनत्ति ।

अथ शशकमांसगुणाः

(बल्यं वि) बलाभिष्यन्दि तत्स्यात् ज्वरहरणपरं क्षीणरेतःप्रधानं
शस्तं वातामयानां शशकजपिशितं हन्ति कुष्ठामयांश्च ॥ २० ॥

अथौष्ट्रादिमांसगुणाः ॥

औष्ट्रं सलवणं मांसं मांसमेकशफोद्भवम् ।
अल्पाभिष्यन्दि वर्गोऽयं जाङ्गलः समुदाहृतः ॥ २१ ॥
द्वुलेः ? जलपातनिलयादूरपानीयगोचराः ।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दना मताः ॥ २२ ॥

अथ वनचारिणां गुणाः ॥

माधुर्याद् गुरवोऽतिरूक्षदहनाः शोषे मदोत्थे विषे
श्रेष्ठा मूत्रपुरीषला बलकराः कासार्शनाशप्रदाः ।
वातं पित्तरुजो हरन्ति सततं स्निग्धाश्च काश्र्यापहाः
सर्वे ते वनचारिणः कफहरा मेहे हिताः सर्वदा ॥ २३ ॥

अथ मांसानां गौरवलाघवविचारः ॥

नादेया गुरवो मध्ये यस्मात्पुच्छास्यचारिणः ।
सरस्तडागजानां तु विशेषात् सारसो लघुः ॥ २४ ॥
अदूरगोचरा यस्मात्तस्मादुत्सोद पादलाः (?) ।
किंचिन्मुक्ताः शिरोदेशे अत्यर्थं गुरवस्तु ते ॥ २५ ॥
अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ।
उरोविचारणास्तेषां पूर्वमङ्गं लघु स्मृतम् ॥ २६ ॥
शिरः स्कन्धः कटिः पृष्ठं सक्थिनी चाम आशयः ।
गुरु पूर्वं विजानीयाद्वातस्तुपथात्तरम् (लघवस्तु यथोत्तरं) ॥ २७ ॥

सर्वेश्च प्राणिनां देहे मध्यो गुरुरुदाहृतः ।
पूर्वभागो गुरुः पुंसामधोभागस्तु योषिताम् ॥ २८ ॥
उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतम् ।
पक्ष्योक्ष्ये पार्श्वमाहृष्टो (?) मध्यभागस्तु पक्षिणाम् ॥ २९ ॥
अतीव मांसं रूक्षं च विहङ्गानां पलाशिनाम् ।
बृंहणं मांसमत्यर्थं खगानां पिशिताशिनाम् ॥ ३० ॥
मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणाम् ।
जाङ्गलानूपगा ग्राम्याः क्रव्यादैकशफास्तथा ॥ ३१ ॥
प्रसहा बिलवासाश्च यथासंघातसंशिताः (?) ।
प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरम् ॥ ३२ ॥

अथ वाराहमांसगुणाः ॥

दुर्नामानिलदोषहं कृमिहरं वाराहमांसं सदा
स्निग्धं स्वेदनवृष्यशीतबलकृद् हृद्रोगसंवर्धकम् ।
कासश्वासहरं प्रमेहशमनं हिक्काऽनिलध्वंसकं
चाक्षुष्यं तु विदाहि च भ्रमहरं वाराहमांसं सदा ॥ ३३ ॥

अथ शङ्ककूर्मादिगुणाः ॥

शङ्ककूर्मादयः स्वादुरसपाका मरुत्प्रदाः ।
स्निग्धाः शीता हिताः पित्ते वर्चःश्लेष्मविवर्धनाः ॥ ३४ ॥
कृष्णकर्कटकस्तेषां बल्यः को (सो) ष्णोऽनिलापहः ।
शुक्लः सन्धानकृत्सृष्टविण्मूत्रोऽनिलपित्तहा ॥ ३५ ॥

अथ मत्स्यगुणाः ॥

नादेया मधुरा मत्स्या गुरवो मान्द्यतापहाः ।
रक्तपित्तकराः सोष्णा वृष्याः स्निग्धाल्पवर्चसः ॥ ३६ ॥
कषायानुरसस्तेषां शिष्यः (श्रेष्ठः) शैवालभोजनः ।
रोहितो मारुतहरो नात्यर्थं पित्तकोपनः ॥ ३७ ॥
मत्स्या द्वेधा दुद्वपन्नेंद्वम्बु (?) जाता
स्तस्मात्पूर्वे पञ्चधा कल्पनीयाः ॥
नद्याः कौपाः सारसा वैद्युतोत्था-
स्ताडागोत्थाः सागरोत्थास्तथा स्युः ॥ ३८ ॥

अथ ऋतुभेदेन मत्स्यविशेषाणां हितत्वम् ॥

ऋतुः प्रभै (ऋतौ मधौ) निर्झरिषु प्रजाता
मत्स्या हिता ग्रीष्मऋतौ च चौद्याः ।
तडागजाः प्रावृषि सर्व एव
स्निग्धा बलिष्ठाश्च सृजन्ति दोषान् ॥ ३९ ॥
शरद्यृतौ निर्जरि (झर ?) जाश्च कूपजा
हिता हि मत्स्याः शिशिरेऽब्धिजाताः ॥
(शिशिरे सारसा मत्स्या वसन्ते ह्रदसम्भवाः ।
ग्रीष्मे तु चौण्ड्यजा मत्स्याः प्रावृट्काले तडागजाः ॥ ४० ॥
शरदि नैर्झरा मत्स्याः हेमन्ते कूपसम्भवाः)
षट्कलो नदिकावर्तो ग्रही लघुतरः स्मृतः (?) ।

अथ स्थानानुसारेण मत्स्यानां गुणाः ॥

सरस्तडागसंभूताः स्निग्धाः स्वादुरसाः स्मृताः ॥ ४१ ॥
कौप्या वृष्या वातहृच्छ्लेष्मलाश्च
गुल्माष्ठीलानाहकुष्ठप्रदाः स्युः ।
ताडागमत्स्यो गुरुर्बृंहणीयः
तथा च शीतो वृषदोऽतिमूत्रः ।
ताडागवन्निर्झरजाश्च मेध्या
चत्तू (?) स्थिरायुष्यबलप्रदाश्च ॥ ४३ ॥
मम तद श्रु (महासरस्सु) बलिनः स्वल्पाम्भस्स्वबला मताः ।
सामुद्रो गुरुरुष्णरूक्षमधुरः श्लेष्मलो वातहा स्यात्
(श्लेष्माधिको वातहा)
स स्नेहाभिविवर्धनो ब (ल) करो विष्टम्भकाध्मानकृत् ।
पित्तोद्रेककफात्ययेषु विहितो मेध्योऽतिहृद्यः सदा
विष्टम्भं जनयेच्च शीतपवनव्यापादमत्यग्रतः ॥ ४४ ॥
त्रिदोषशमनो हृद्यः पित्तघ्नः पवनापहः ।
सामुद्रो रोहितः शस्तः सर्वरोगेषु दीपनः ॥ ४५ ॥
सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः ।
उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्धनाः ॥ ४६ ॥
बलावहा विशेषेण मांसाशित्रा (त्वात्) त्समुद्रजाः ।
सामुद्रजेभ्यो नादेयाः स्युर्लघुत्वाद्गुणोत्तराः ॥ ४७ ॥
ततोऽप्यत्यनलत्वाच्च चौद्यकौप्यौ गुणोत्तरौ ।
स्निग्धत्वात्स्वादुपाकत्वात्ततो वाप्या गुणाधिकाः ॥ ४८ ॥

अथ ककरादीनां गुणाः ॥

विष्टम्भाध्मानमेहघ्नः ककरः कफवातहृत् ।
मेदःश्लेष्मानिलहरो हिध्माऽऽध्मानविकारहा ॥ ४९ ॥
प्रवरो रोहितो मत्स्यः पित्तघ्नः पवनापहः ।
बृंहणो वातशमनो वातघ्नो दीपनो लघुः ॥ ५० ॥
मत्स्यानां च गुरुः श्रेष्ठो दीपनो वातनाशनः ।
रुचिप्रदः शुक्रकर आश्मरीदोषनाशनः ॥ ५१ ॥ गुरुमत्स्यः ॥
शृङ्गी वातविनाशनो रुचिकरो वृष्यः कफघ्नो मतः
कण्टाको विशदो वृषानलकरो वाते कफे पूजितः ।
पाठीनो बलवृष्यशुक्रजननः श्लेष्माकरो नित्यशः
तस्माद्रोहितको हितो बलकरो वातात्मकः श्लेष्मलः ॥ ५२ ॥
॥ इति मत्स्याः ॥

॥ इत्यायुर्वेदमहोदधौ सुपेणकृते मांसवर्गः ॥

॥ इदानीं व्यायामोद्वर्तनाभ्यङ्गविधिगुणाः कथ्यन्ते ॥

श्रीनारायणतैलचम्पकजपातैलेन चान्येन वा
कार्यं मर्दनकोविदैः क्षितिभुजां मल्लैः सदा मर्दनम् ।
चातुर्जातलवङ्गकुङ्कुमनिशामुस्तासुमांसीभवै-
श्चूर्णो (र्णैः) भृष्टमसूरमुद्गसहितैरुद्वर्तनं कारयेत् ॥ १ ॥
वातघ्नौषधसिद्धेन तैलेनाभ्यज्य मर्दयेत् ।
न रूक्षमर्दनं कुर्यात्तद्धि वातप्रकोपणम् ॥ २ ॥

अधिगतसुखनिद्रः सुप्रसन्नेन्द्रियात्मा
सुलघुजठरवृत्तिर्भुक्तयङ्क्ति दधानः ।
श्रमभरपरिखिन्नः स्नेहसंमर्दिताङ्गः
सवनगुरुमुपेयाद्भूपतिर्मर्दनाय (?) ॥ ३ ॥

अभ्यङ्गः श्रमवातहा बलकरः कायस्य दार्ढ्यावहः
स्यादुद्वर्तनमङ्गकान्तिकरणं मेदःकफालस्यजित् ।
आयुष्यं हृदयप्रसादि वपुषः कण्डूक्लमच्छर्दिकृत् (छेदकृत्)
स्नानादेव यथर्तु सेवितमिदं शीतैरशीतैर्जलैः ॥ ४ ॥

अथ व्यायामगुणाः ॥

सामर्थ्यं सकलक्रियासु लघुतामङ्गेषु दीप्तिं परां
अग्नेः पाटवमिन्द्रियेषु लघुतां छेदं परं मेदसः ।
उत्साहं मनसः शरीरदृढतां शान्तिं बलाद्यापदां
व्यायामः शिशिरे वसन्तसमये कुर्याद्विमे सेवितः ॥ ५ ॥

अथ व्यायामवर्ज्याः ॥

वातामयः पित्तरुजाऽन्विताश्च
बालोऽतिवृद्धोऽपि कृशोऽतिजीर्णः (प्यर्जार्णो) ।
मन्दानलः स्निग्धरसान्नवर्जी
व्यायामकालेषु विवर्जनीयाः ॥ ६ ॥

स्थाल्यां यथाऽनावरणीकृतायां
असंहितायां न च साधुपाकः ।
अनाप्तनिद्रस्य तथा नरेन्द्राः
व्यायामहीनस्य न चानु पाकः ॥ ७ ॥

अथ पादमर्दनगुणाः ॥

वातव्याधिहरं कफप्रशमनं कान्तिप्रसादावहं
त्वग्वैवर्ण्यविनाशनं रुचिकरं सर्वाङ्गदार्ढ्यप्रदम् ।
अग्नेर्दीप्तिकरं बलोपजननं प्रस्वेदमेदोऽपहं
पद्भ्यां मर्दनमादिशन्ति मुनयः श्रेष्ठं सदा प्राणिनाम् ॥ ८ ॥

अथ पादमर्दनवर्ज्याः ॥

सुकुमारस्य मन्दाग्नेः किंचित्क्षीणबलस्य च ।
पित्तलस्यापि नो कार्यं कदाचित्पादमर्दननम् ॥ ९ ॥
व्यायामखिन्नगात्रस्य पद्भ्यां मर्दनितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥ १० ॥
सुवर्णवर्णं कुरुते शरीरं
दृढत्वमङ्गे च ददाति सद्यः ।
सर्वक्रियालाघवमातनोति
संमर्दनं मल्लवरैः कृतं यत् ॥ ११ ॥
वातव्याधिं जयति कुरुते .....।
" सर्वपते मम चैष
सग्रस्तस्या स एव समयः क्षुधितो पदैव ॥ १२ ॥
यः क्षौध्यलोभ्यभावेन कुर्यादाह च भोजनम् ।
सुप्तव्यालां निलाव्याधीन् ध्यादीन् सोन्यथा यः प्रबोधतेत् ॥ १३ ॥
यः कोकवन्यमद्राकामि स नक्तं भोक्तुमर्हति ।
संभोक्ता वासरेयश्च रात्रौरेताश्चकोरवत् " (१) ॥ १४ ॥

अथ भोजननियमाः ॥

हृन्नाभिपद्मसंकोचश्चण्डरोचेरपायतः ।
अतो नक्तं न भोक्तव्यं वैद्यविद्याविदां वरैः ॥ १५ ॥
देवार्चां भोजनं निद्रामाकाशे न प्रकल्पयेत् ।
नान्धकारे च सन्ध्यायां नावितानेनिकेतने ॥ १६ ॥
भुक्तौ स्वादे मलोत्सर्गे यः संबाधासमाकुलः ।
निःशङ्कत्वात्ययात्तस्य "कोकनस्यूर्मदापमाः" (?) ॥ १७ ॥
विवर्णास्विन्नविक्लिन्नविगन्धिविरसस्थिति ।
अतिजीर्णमसात्म्यं च नाद्यादन्नं च वारितम् ॥ १८ ॥

भुक्त्वा वर्ज्यानि ॥

का (भा) सकापोतपायसयानवाहबहुपयः (हूदकम्) ।
भोजनानन्तरं सेव्यं न जातु हितमिच्छता ॥ १९ ॥

भोजनविधिः ॥

हितं परिमितं पक्वं नेत्रनासारसप्रियम् ।
परीक्षितं च भुञ्जीत न द्रुतं न विलम्बितम् ॥ २० ॥

अत्यशनमध्यशनं
शमनमशतं (समशनविषमाशनं) च संत्याज्यम् ।
" कुर्याद्यच्छोक्तशमनं
बलजीवितपेशलं क्रमशः" (?) ॥ २१ ॥

भोजनक्रमः ॥

आदौ स्वादु स्निग्धं
तन्मध्ये लवलमलापू (लवणमम्लमु) पभोज्यम् ।
रूक्षं द्रवं च पश्चा-
न्न च भुक्ते भक्षयेत्कचित् किंचित् ॥ २२ ॥

अग्नेश्चातुर्विध्यम् ॥

मधुस्तिक्तो (मन्दस्तीक्ष्णो) विषमः
समश्च वह्निश्चतुर्विधः पुंसाम् ।
लघु मन्दे गुरुस्तिक्तं (तीक्ष्णे)
त्वद्याद् विषमे समं समेऽप्यद्यात् ॥ २३ ॥

अथ भोजनसङ्ख्याप्रस्तावः ॥

जीर्यत्यन्नं सुखं भुक्तमेकवारं यदृच्छया ।
द्विकालमपि भुञ्जीत समाग्निस्त्वर्धमात्रया ॥ २४ ॥
कठिनं दुर्जरं यच्च यद्विदाहकरं भवेत् ।
तत्सर्वं निशि वर्ज्यं स्याद् द्रवं लघु च शीलयेत् ॥ २५ ॥

अथ विषदूषितान्नपरीक्षा ॥

घ्वाङ्क्षः स्वरान् विकुरुतेत्र पिकांत्यकश्च (?)
बभ्रुः शिखंडितनयः प्रभवेत् प्रहृष्टः ।

क्रौञ्चः प्रमोदति विरौति च ताम्रचूडः
छर्दिं शुकः प्रतनुते दहते कपिश्च ॥ २६ ॥
रक्तश्वेते चकोरस्य लोचने विषदर्शनात् ।
गतिश्च लक्षि (स्खलति) हंसस्य लीयन्ते चात्र मक्षिकाः ॥ २७ ॥
यथा लवणसंपर्कात् स्फुटस्फुटति पावकः ।
केषु (विष) दुष्टान्नसंपर्कस्तथा च सुप्रतीयते ॥ २८ ॥
मया सुषेणेन कृतं हिताय
प्राणं प्रसादं तनयेच्च (?) शीघ्रम् ॥

इत्यायुर्वेदमहोदधौ सुषेणकृते भोजनविधिवर्गः ॥

अथ ताम्बूलगुणाः कथ्यन्ते ॥

कर्पूरकङ्कोललवङ्गपूग-
जातीफलैर्नागरखण्डपर्णैः ।
सुधाऽश्मचूर्णं खदिरस्य सारं
कस्तूरिकाचन्दनचूर्णमिश्रम् ॥ १ ॥
ताम्बूलमेतत्प्रवरं वदन्ति
सौभाग्यदं कान्तिसुखप्रदं च ।
आरोग्यमेधास्मृतिबुद्धिवृद्धिं
करोति वह्नेरपि दीपनं च ॥ २ ॥
अनङ्गसंदीपनभावमध्ये
प्रधानमेतत्समुदाहरन्ति ।

अतो हि सर्वं (वें) सुखिनो मनुष्या
अहर्निशं प्रीतिकरं भजन्ते ॥ ३ ॥
ताम्बूलपत्राणि हरन्ति वातं
पूगीफलं हन्ति कफप्रसेकम् ।
चूर्णं निहन्यात्कफवातमुच्चै-
र्हन्याच्च पित्तं खदिरस्य सारः ॥ ४ ॥
इत्थं हि ताम्बूलमुदाहरन्ति
दोषत्रयस्यापि निवारणाय ।
अतोऽत्र सेवेत नरः कथञ्चिद्
विचक्षणः प्राकृतमानुषोऽपि ॥ ५ ॥

अथ ताम्बूलवर्ज्याः ॥

न नेत्ररोगे न च रक्तपित्ते
क्षते च दोषे न विषे न शोषे ।
मदात्यये नापि न मोहमूर्छा-
श्वासेषु ताम्बूलमुशन्ति वैद्याः ॥ ५ ॥

अथ ताम्बूलकालनियमः ॥

भुक्त्वाऽन्नं सलिलं पीत्वा भुक्त्वा च बहु भोजनम् ।
प्रतीक्ष्य घटिकामेकां ताम्बूलं भक्षयेन्नरः ॥ ६ ॥

अथ जातीफलगुणाः ॥

वातश्लेष्मप्रशमनं हृद्यं वह्नेश्च दीपनम् ।
मुखवैरस्यहरणं सद्योभुक्तविपाचनम् ॥ ७ ॥
जातीफलं पाचनमग्निदीपनं
कफापहं कण्ठरुजापहं च ।
रसेकदुः (प्रसेकह) श्रेष्ठमजीर्णनाशे
अजीर्णनामु (?) च पथ्यमेतत् ॥ ८ ॥
कलिका दीपनी रुच्या पाके चातितरां हिमा ।
वातपित्तकफान् हन्ति ज्वरच्छर्दिनिबर्हणी ॥ ९ ॥

अथैलागुणाः ॥

एलाद्वयं छर्दिषु मूत्रकृच्छ्रे
मदे च वै पथ्यमरोचके च ।

अथ जातिपत्रीगुणाः ॥

स्वादुः सुशीता मधुरा च पाके
अरोचकं हन्ति च जातिपत्री ॥ १० ॥

अथ क्रमुकपाककालनियमः ॥

ताम्बूलयोग्यं क्रमुकं तु तज्ज्ञा
मासत्रयादूर्ध्वमुदाहरन्ति ।
मासे व्यतीते तु भवन्ति पूर्णा-
न्यतीव हृद्यानि मनोहराणि ॥ ११ ॥

अथ क्रमुकताम्बूलविशेषाणां गुणविशेषाः ॥

स्थूलं क्रमुकताम्बूलं श्लेष्मलं कृमिवर्धनम् ।
तदन्ते शुक्लवर्णाद्यं श्लेष्मलं कृमिनाशनम् ॥ १२ ॥

अथ कर्पूरगुणाः ॥

तीक्ष्णोष्णः परिणामशीतलतरः कण्डुप्रमेहापहः
नासाऽऽस्रावजलापहः कृमिहरस्तृट्श्वासकासं जयेत् ।
श्लेष्मघ्नश्च गलग्रहापहरणः संसुप्तजिह्वाऽग्रजित्
कर्पूरः खलु दीप्यसौरभगुणः पित्तामयः स्फाटिकः ॥
गलग्रहे सुप्तजिह्वे नाना श्राव (नासास्राव) जलाधिके ।
श्लेष्ममेहकृमीन् हन्ति कर्पूरश्चाक्षुषोऽपरः ॥
प्रमेहतृड्विदाहघ्नो लक्ष्मीसौभाग्यवर्धनः ॥ १६ ॥

अथ कस्तूरीगुणाः ॥

कस्तूरी सौरभाढ्या कटुकरसयुता क्षारतिक्ता कषाया
शोकाटोपापहन्त्री कफपवनहरा पित्तकृच्चाक्षुषी च ।
चित्तप्रोल्लासहेतुर्विषमविषगरान् गात्रदौर्गन्ध्यहन्त्री
क्षुत्तृष्णापित्तकोपं प्रशमयति भृशं क्लैब्यशोषं विषं च ॥ १७ ॥

अथानुलेपनवर्गः ॥

चन्दनं रक्तपित्तघ्नं दाहमूर्छाऽतिसारनुत् ।
शीतलं श्लेष्मलं हृद्यं किंचिद्वातप्रकोपणम् ॥ १८ ॥

पित्तास्रं हरते सदाहदवनं व्यायादयत्तः (?) सदा
मूर्छामोहतृषाविषप्रशमनं दुर्गंधिनिर्णाशनम् ।
कण्डूकुष्ठभगन्दरस्य सदनं मूर्छां छिनत्ति स्फुटं
मेहं कृच्छ्रमपि व्यपोहति सदा दुर्नामनिर्णाशनम् ॥ १९ ॥
रोगानीकविधा व्यपोहति सदा मोषाश्रयः (?) सौरभः ॥
मलयाद्रिर्मोहदोषघ्नो रक्तपित्तनिबर्हणः ।
मूर्छाशोषप्रशमनो वक्त्रदौर्गन्ध्यनाशनः ॥ २० ॥
शीतं पित्तविनाशनं समधुरं किंचित्सतिक्तं तथा
कण्डूशोफविषापहं क्रिमिहरं सौभाग्यकान्तिप्रदम् ।
सौगन्ध्यं कुरुते किमप्यभिनवं गात्रेषु पुष्टिप्रदं
संतोषं विदधाति चेतसि परं स्निग्धं च तृष्णाहरम् ।
ऋतुषु समययोज्यं चन्दनं कुङ्कुमं वा
मृगमदघनलेपः सेव्यते सर्वदैव ।
सुरतकुसुमदामस्फारकर्पूरचूर्णो
विमलधवलवासः सर्वकालोपयोग्यः ॥ २२ ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृतेऽनुलेपनवर्गः ॥

अथातो वस्त्रगुणाः कथ्यन्ते ॥

श्वेतं दुकूलं विमलं कफवातानुलोमनम् ।
यद्वा सूत्रमयं वस्त्रं त्रिदोषशमनं विदुः ॥

सुश्वेतं तु दुकूलमत्र बलकृत्पित्तप्रशान्तिप्रदम्
ओजोदीप्तिविवर्धनं रतिकरं मर्मातिदाहच्छिदं ।
तृष्णादोषविभेदनं धृतिकरं कान्तिप्रदं श्लेष्मलं
क्षौमं शुक्लमतीव हृद्यममलं पित्तामयध्वंसकम् ॥ २ ॥
माञ्जिष्ठं च विदाहि तत्कफहरं पथ्यं च वातामय-
ध्वंसं चारुतरंसदैव कुरुते श्लेष्मप्रकोपं जयेत् ।
उष्णं शीतविघातकं मलहरं सश्लेष्मवातापहं
विद्याघ..... (?) मयहरं माञ्जिष्ठवस्त्रं सदा ॥ ३ ॥

॥ इत्यायुर्वेदमहोदधौ सुषेणकृते वस्त्रवर्गः समाप्तः ॥

॥ समाप्तोयं सुषेणकृतग्रन्थः ॥

॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥ ॥ शुभं भवतु ॥

॥ श्रीसरस्वत्यै नमः ॥



Sri Venkateswar Printing Works, Kumbakonam.

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	स्थितम्	पाठ्यम्
३	१७	भूम्यूत्खात	भूम्युत्खात
४	१७	चौण्डय	चौण्डच
५	११	दोष प	दोषं प
६	२	४५	४२
७	२१	जीरयत्याशु	जरयत्ययाशु
,,	२२	५७	५६
१०	१२	तत्व	तत्त्व
,,	१३	युत्तया	युक्त्या
११	१९	सृक्वल	सृग्वल
१३	१३	पचितं	पाचितं
२०	१३	विषैः	विशेषैः
२६	१५	रूषवान्	रूपवान्
२९	५	शीतकालेऽग्न	शीतकालेऽग्नि
३०	५	पिब	पिब
,,	१२	तक्रकूर्जका	तक्रकूर्जका
३१	२	शातिं	शीतं
,,	८	बलाढयं	बलाढ्यं
३२	१२	मानुषणां	मानुषाणां

पृष्ठे	पङ्क्तौ	स्थितम्	पाठ्यम्
३८	९	इक्षु	इक्षु
३९	५	वंशवच्छेत	वंशवच्छ्वेत
४१	४	जननछर्दि	जनन^छर्दि
४३	८	पाण्दु	पाण्डु
४४	९	मत्र	मूत्र
४८	३	कफु	कफ
५६	१	कापूरपडीया	कापूरपडीया (भा०)
५८	१	मुद्गवटकाः।(भा०)	मुद्गवटकाः
,,	१०	सर्वन्नम्	सर्वमन्नम्
६२	१२	हर	हरं
६५	११	अ नालिकेरी	अथ नालिकेरी
८४	१५	सुषेणोः	सुषेणो
८९	१	मास	मांस
,,	२	जाङ्गलं	जाङ्गलं
९४	१४	म्यङ्ग	म्यङ्ग
९५	२	यङ्क्ति	यङ्क्ति (?)
९८	११	स ङ्ख्या	सङ्ख्या